१. ग. लाजार्चनं । घ. गौडागमं । २. घ. उक्तमार्गक्रमे । ३. घ. सृष्टयर्चां । ४. ख. ग. घ. निशायां । ५. ख. ग. घ. भृगुवासरे । ६. घ. सुवासितेन । ७. ग. ०दभ्यंगना । , ०दभ्यंगकं । ८. घ. ०मानीय । ९. घ. ०मुखेन । १०. ख. घ. समास्तीर्यं । ११. घ. ध्रुवा द्यौरिति । १२. घ. तन्मुखे छयनं । १३. घ. प्रस्तार्यं । १४. ख. तां कन्यां । १५. घ. तत्र चांगानि । १६. ख. घ. संस्पृशेत् । १७. ख. घ. पुस्तकद्वये विशेषः पाठः—

घनंजयपुरं चैव अर्चयेन् (घ. मार्जयेन्) मूलविद्यया ।

१८. घ. गन्धद्वारेण । १९. घ. तस्यैव । २०. ख. घ. समर्पयेत् ।

अथवा पौर्णमास्यां वा सौभाग्यार्चनमाचरेत् ।
प्रयोगसिद्धिदं शस्तं[१] मंत्रसिद्धिकरं परम् ॥१७॥
एतत्पूजां विना पुत्र प्रयोगं न भवेत् कलौ ।
तस्मात् सर्वप्रयत्नेन प्रयोगादि च भूतले ॥१८॥
सौभाग्यार्चां विना पुत्र न भवेज्जपकोटिभिः ।
अभिमानाष्टकं त्यक्त्वा त्यक्त्वा चैवेषणात्रयम् ॥१९॥
त्यक्त्वा पञ्चेन्द्रियासक्ति सोभाग्यार्चनमाचरेत् ।
सुखदुःखे समे[२] कृत्वा लाभालाभौ जयाजयौ ॥२०॥
शीतोष्णे[३] समतां कृत्वा सौभाग्यार्चनमाचरेत् ।
षोढाद्वयं च न ज्ञात्वा यः करोत्यर्चनं भुवि ॥२१॥
स पतितो भवेत् पुंसां रौरवं नरकं व्रजेत् ।
बाह्याभ्यंतरतः[४] पुत्र अभेदज्ञानयोर्विना ॥२२॥
सौभाग्यार्चनकर्त्तॄणामनन्तं[५] शापमाप्नुयात् ।
संकल्पं च विकल्पं च त्यक्त्वा विश्रान्तमानसः[६] ॥२३॥
कुर्यात् सौभाग्यसम्पूजां च नो चेद् भ्रष्टो भवेन्नरः ।
जितेन्द्रियः[७] सुखं त्यक्त्वा कुर्यात् सौभाग्यपूजनम् ॥२४॥
सुखापेक्षेण यत् कुर्याद् देवताशापमाप्नुयात् ।
स्वस्थादेशविधिं[८] चैव न ज्ञात्वा क्रौञ्चभेदन ॥२५॥
यः करोत्यर्चनं चैव स विप्रः पतितो भवेत् ।[९]
स्वपत्नीं भ्रातृपत्नीं वा गुरुभार्यामथापि वा ॥२६॥
अर्चयेत् षड्रसोपेतां[१०] सांख्यायनमतं त्विदम् ।
दीक्षालयस्थां रजकीं कुलालगृहकन्यकाम् ॥२७॥

---

१. घ. पुंसां । २. घ. समौ । ३. घ. शीतोष्णे । ४. ग. ब्रह्माभ्यन्तरतः । घ. बाह्याभ्यन्तरयोः ५. घ. ०कर्तॄणां देवता । ६. घ. विश्रान्तमानसः । ७. घ. जिह्वेन्द्रिय । ८. घ. स्वस्थदेशाविधि । ९. अतः परं ख. घ. पुस्तकद्वये विशेषः—

"कल्पते (करोति घ.) चित्तसंक्षोभं तत् (घ. त्वत्) कन्यायाः कुमारक ।
भ्रान्तचित्तो भवेत् सद्यो (घ. सोपि) वाचस्पतिसमोऽपि वा" ॥

घ. पुस्तकेऽस्मादप्यधिकोऽयमंशो दृश्यते—

"नोत्पादयेत् कामनया वेदनं च शरीरयोः ।
वेदनां जनयेद्यस्तु स नरः पतितो भवेत्" ॥

१०. घ. यौवनोपेतां ।

पुलिन्दकन्यकां चैव मृकण्डुमतमादिशेत् ।
अर्चयेद् ऋषिपत्नीं[1] च पूर्वोक्तां लक्षणान्विताम् ॥२८॥
अर्चयेद्[2] विधिमार्गेण पूजा दूर्वाससम्मता[3] ।
सर्वलक्षणसम्पन्नां पुष्पिणीमर्चयेत्ततः[4] २९॥
मतङ्गमुनिनोक्तं च[5] सद्यः सिद्धिकरं भुवि ।
इति[6] मार्गमतं[7] पुत्र नास्ति सिद्धिर्गुरोर्विना ॥३०॥
तस्मात् सर्वप्रयत्नेनार्चयेद्[8] गुर्वनुज्ञया ॥३१॥

॥ इति षड्विद्यागमे सांख्यायनतन्त्रे चतुर्दशः पटलः ॥१४॥

॥ अथ पञ्चदशः पटलः ॥

पीतवर्णां मदाघूर्णां दृढपीनपयोधराम् ।
वन्देऽहं वगलां देवीं स्तम्भनास्त्रस्वरूपिणीम् ।

क्रौञ्चभेदन उवाच—

राजराज स वै[9] श्रीमान् रजताद्रिनिकेतन ।
पञ्चास्त्रविद्यां वद मे स्तंभनाख्यान्सपावनान्[10] ॥२॥

ईश्वर उवाच—

आद्यास्त्रं वगलानाम्नी रणस्तम्भनकारणम्[11] ।
उल्कामुखी द्वितीयं[12] च स्तम्भनं भुवनत्रये ॥३॥
ज्वालामुखी तृतीयास्त्रं स्तम्भनं त्रिषु[13] दैवतैः ।
जातवेदमुखी चैव चतुर्थास्त्रं कुमारक ॥४॥
ब्रह्मविष्णुमहेशानां स्तंभनं नात्र संशयः ।
बृहद्भानुमुखी चास्त्रं पञ्चमं तु कुमारक ॥५॥
षट्पञ्चकोटिचामुण्डा कालिकादिशतं[14] सुत ।
सपादकोटि त्रिपुरा स्तंभनास्त्रं च उत्तमम्[15] ॥६॥

---

१. घ. वैश्यपत्नीं । २. घ. अर्चनं । ३. घ. दुर्वाससंमता ४. घ. पुष्पितां० । ५. घ. मातंगमुनिना चोक्तं । ६. ख. ग. घ. सिद्धि । ७. घ. मार्गगतं । ८. ख. ०प्रयत्नेन वा० । ग. घ. प्रयत्नेन अर्चयेद् । ९. ख. सुख । ग. स चे । घ. सख । १०. ख. स्तंभनाख्यं सुपावनी । घ. स्तंभनाख्यां सुपावनीं । ११. घ. ०कारणीम् । १२. घ. द्वितीया । १३. घ. ऋषि । १४. घ. कालिकोटिशतं । १५. घ. पञ्चमम् ।

पञ्चास्त्रोद्धारमतुलं तत्प्रयोगविधिं तथा ।
वक्ष्ये तस्योपसंहारं साम्प्रतं तव[१] पुत्रक ॥७॥

तारं च विलिखेत् पूर्वं स्तब्धमायामतः परम् ।
वाराहं शक्तिवाराहं वगलामुखि चोच्चरेत् ॥८॥

ह्लां ह्लीं ह्लूं[२] च ततोच्चार्य सर्वदुष्टपदं वदेत् ।
लंकारं[३] दीर्घसंयुक्तं बिन्दुनादविभूषितम् ॥९॥

ह्लै ह्लौं ह्लश्च[४] ततश्चैव 'वाचं मुखं पदं[५]' वदेत् ।
स्तम्भयद्वितयं प्रोक्त्वा ह्लः ह्लौं ह्लैं[६] च ततो वदेत् ॥१०॥

जिह्वां कीलय उच्चार्य ह्लूं ह्लीं ह्लां[७] च ततः परम् ।
बुद्धिं विनाशयोच्चार्य शक्तिवाराहमुच्चरेत् ॥११॥

वाराहं बगलाबीजं तारवर्मास्त्रसंयुतम्[८] ।
रणस्तम्भनबाणं च दुर्लभं भुवि पुत्रक ॥१२॥

पञ्चाशदुत्तरं पञ्चबीजबद्धं सुपावनम् ।
ऋषिरेवास्य मंत्रस्य वसिष्ठः[९] छन्दसां पुनः ॥१३॥

पञ्चास्यदेवतामन्त्र-[१०] रणस्तम्भनकारिणी[११] ।
न्यासविद्यां च कर्त्तव्यं[१२] पूर्वोक्तं मन्त्रराजवत् ॥१४॥

ध्यानं यत्नात् प्रवक्ष्यामि वगलामुखिदेवता ।
पीताम्बरधरां देवीं द्विसहस्रभुजान्विताम् ॥१५॥

अर्द्धजिह्वां गदा चार्द्धं धारयन्तीं शिवां भजे ।
एवं ध्यात्वा जपेन्मंत्रमर्कलक्षं सुबुद्धिमान् ॥१६॥

तालकेन हुनेल्लक्षं ब्राह्मणान् भोजयेत्ततः ।
गजाश्वरथसामन्तकोटिकोटिबलं तथा ॥१७॥

निर्वीर्यो जायते सद्यो मृतशेषः[१३] पलायते ।
प्रयोगान्ते समभ्यर्च्य मन्त्रसंस्कारमाचरेत् ॥१८॥

---

१. घ. शृणु । २. घ. ह्लां ह्लीं ह्लूं । ३. घ. नकारं । ४. ह्लूं ह्लौं ह्लुश्च । ५. घ. वाचां मुखपदं । ६. घ. ह्लः ह्लौं ह्लूं । ७. घ. ह्लूं ह्लीं ह्लां । ८. घ. तारं वर्मा० । ९. क. ख. ग. वशिष्ठः । १०. ख. पञ्चाख्यं देवतामंत्रं । घ. पंक्त्याख्यो देवता चात्र । ११. ख. ग. घ. रूपिणी । १२. ख. कर्त्तव्यां । घ. कर्त्तव्या । १३. क. ग. घ. मृतः शेषाः ।

संस्कारेण विना मन्त्रं साधकस्य प्रमादकृत् ।
लोकालोकस्तंभनं च नाम्ना उल्कामुखी[1] तथा ॥१६॥
मन्त्रोद्धारं प्रवक्ष्यामि शरजन्मन् समासतः ।
तारं च स्तब्धमायां च शक्तिंवाराहमेव च ॥२०॥
वगलामुखीपदं चोक्त्वा बीजत्रयं तु सर्वं च ।
दुष्टानां पदमुच्चार्य पूर्वबीजत्रयं वदेत् ॥२१॥
वाचं मुखं पदं चोक्त्वा पूर्वबीजत्रयं[2] वदेत् ।
स्तम्भयद्वितयं चोक्त्वा 'बीजत्रयं ततो'[3] वदेत् ॥२२॥
जिह्वां कीलय उच्चार्य पुनर्बीजत्रयं वदेत् ।
बुद्धिं विनाशयोच्चार्य पूर्वबीजत्रयं[4] वदेत् ॥२३॥
प्रणवं वह्निजायां च उल्कामुख्या अयं मनुः ।[5]
पञ्चाशदूर्द्ध्वं चैवाष्टबीजबद्धं[6] सुपावनम् ॥२४॥
ऋषिश्चाप्यग्निवाराहश्छन्दः[7] ककुभमेव च ।
उल्कामुखी देवता च जगत्स्तम्भनकारिणी ॥२५॥
बीजं च वगलाबीजं शक्तिः[8] स्वाहासमन्वितम् ।
कीलकं शक्तिवाराहं न्यासं पूर्ववदाचरेत् ॥२६॥
ध्यानं यत्नात् प्रवक्ष्यामि मन्त्रभेदे[9] कुमारक ।
विलयानलसंकाशां[10] वीरवेषेण[11] संस्थिताम् ॥२७॥
वीराम्नायमहादेवीं[12] स्तम्भनार्थं भजाम्यहम् ।
एवं ध्यात्वा जपेन्मन्त्रं मनुलक्षं कुमारक ॥२८॥
प्रपञ्चस्तम्भनं कृत्वा स्वविद्यां च प्रकाशयेत् ।
तालकेन हुनेत् पुत्र लक्षमेकं हुताशने[13] ॥२६॥
मंत्रसिद्धिर्भवेत् पुत्र त्रैलोक्ये कीर्त्तिमान् भवेत् ।
तस्याज्ञया जगत्सर्वं स्थावरं जङ्गमात्मकम् ॥३०॥
कुमारक प्रवर्त्तन्ते[14] सर्वाश्चर्यकरं भुवि ।
'सिद्धिं चतुर्विधां'[15] चैव एतन्मन्त्रस्य जापके ॥३१॥

---

१. घ. चोल्कां मुखी । २. घ. पुनर्बीजत्रयं । ३. घ. पुनर्बीजत्रयं । ४. घ. पुनर्बीज० । ५. घ. स्तब्धमायां ध्रुवं वह्निजायांतोल्कामुखीमनुः । ६. घ. ०बीजयुक्तं । ७. घ. ऋषिश्च । यज्ञवाराहश्छन्दः । ८. घ. शक्ति । ९. घ. मन्त्रभेदं । १०. घ. विनया० । ११. ख. वीरवेशेन । घ. वीरावेशेन । १२. घ. विराणमयीं महादेवीं । १३. क.ख.ग. क्षपाशनः । १४. घ. प्रवर्त्तंत । १५. ख. घ. सिद्धिश्चतुर्विधा ।

इच्छया वर्त्तते सर्वमाश्चर्यकरमादरात् ।
नदी नदश्च[1] रतिमान्[2] नानापादपसंकुलम् ॥३२॥

आगच्छेत्याज्ञया[3] तस्य पुनर्गच्छन्ति चादरात्[4] ।
किन्न स्यात् पद्ययुक्तानि माहात्म्यं पदगं मनोः[5] ॥३३॥

कामयेन्मन्त्रमेतद्धि[6] क्रौंचभेदनकोविद ॥

इति षड्विद्यागमे सांख्यायनतन्त्रे पञ्चदशपटलः[7] ॥१५॥

॥ अथ षोडशः पटलः ॥

बन्धूककुसुमाभासां[8] बुद्धिनाशनतत्पराम् ।
वन्देऽहं वगलां देवीं स्तम्भनास्त्राधिदेवताम् ॥१॥

क्रौञ्चभेदन उवाच—

नमस्ते गिरिजानाथ मन्त्रविद्यागमप्रभो ।
अधुना चास्त्रविस्तारं वद मे करुणाकर ॥२॥

ईश्वर उवाच—

तारं च स्तब्धमायां च प्रासादं[9] च ततः परम् ।
पुनर्लिख्य[10] स्तब्धमायां प्रणवं च ततः परम् ॥३॥

वगलामुखिपदं चोक्त्वा सर्वदुष्टपदं वदेत् ।
न(ल?)कारं दीर्घसंयुक्तं बिन्दुना भूषितं तथा ॥४॥

बीजपञ्चकमुच्चार्य वाचं मुखं पदं वदेत् ।
स्तंभयद्वयमुच्चार्य पञ्चबीजानि चोच्चरेत् ॥५॥

जिह्वां कीलय उच्चार्य पञ्चबीजानि चोच्चरेत् ।
बुद्धिं विनाशययुगं[11] पञ्चबीजानि चोच्चरेत् ॥६॥

वह्निजायासमायुक्तं[12] षष्टिवर्णात्मकं[13] मनुम्[14]।[15]
जातवेदमुखीमन्त्रं जगदाश्चर्यकारकम् ॥७॥

अर्कपञ्चकवर्णेन बद्धोऽयं मन्त्रनायकः ।
ऋषिः कालाग्निरुद्रस्तु पंक्तिश्छन्द उदाहृतम् ॥८॥

---

१. घ. नदाश्च । २. घ. गिरयो । ३. घ. आगच्छन्त्याज्ञया । ३. घ. सादरात् ।
५. ग. किन्न तस्यात्पद्ययुक्तानि० । घ. पुस्तके विशेषः—

कि तस्य जपयुक्तानां माहात्म्यं चेदृशं मनोः ।
यद्गोपयति पुण्यात्मा त्रैलोक्याकर्षणक्षमः ॥

६. घ. गोपयेन्मंत्र० । ७. घ. ०अस्त्रप्रयोग पञ्चदशपटलः । ८. घ. भाषां । ९. ख. ग. प्रसादं । १०. घ. पुनर्लिखेत् । ११. घ. नाशययुग्मं च । १२. ख. ०समायुक्तः । १३. ख. ०त्मको । १४. ख. मनुः । १५. पादद्वयं घ. पुस्तके नास्ति ।

जातवेदमुखी मंत्रदेवता[1] समुदाहृता ।
ॐ बीजं ह्लीं[2] च शक्तिश्च हुं कीलकमुदाहृतम् ॥९॥

पूर्ववन्न्यासविद्यां[3] च ध्यानं वक्ष्यामि पुत्रक ।
जातवेदमुखी देवी देवता प्राणरूपिणी ॥१०॥

भजेऽहं स्तम्भनार्थं च स्तम्भनीं[4] विश्वरूपिणीम्[5] ।
एवं ध्यात्वा जपेन्मन्त्रं त्रिशल्लक्षं सुपावनम् ॥११॥

चर्मधृग्वसनो भूत्वा चिन्तितार्थप्रदं ध्रुवम् ।
गन्धर्वांश्चैव यक्षांश्च गरुडोरगपन्नगान् ॥१२॥

वेतालडाकिनीप्रेतशाकिनीब्रह्मराक्षसान् ।
ऋषिदेवगणांश्चैव सिद्धानन्यांश्च पुत्रक ॥१३॥

अधुना स्तम्भयत्येतत्[6] सत्यं शङ्करभाषणम् ।
तारं च स्तब्धमायां च वह्निबीजं च पंचकम् ॥१४॥

प्रस्फुरद्वितयं चैव बीजं चैव[7] त्रयोदश ।
ज्वालामुखी 'पदं चोक्त्वा'[8] वदेद्बीजं[9] त्रयोदश ॥१५॥

सर्वशब्दं ततोच्चार्यं दुष्टानां पदमुच्चरेत् ।
बीजं[10] त्रयोदशं चोक्त्वा वाचं मुखं पदं वदेत् ॥१६॥

स्तम्भयद्वितयं चोक्त्वा पुनर्बीजं[11] त्रयोदश ।
जिह्वां कीलय चोच्चार्य[12] पुनर्बीजं त्रयोदश ॥१७॥

बुद्धिं 'विनाशयं चोक्त्वा'[13] पुनर्बीजं त्रयोदश ।
वह्निजायासमायुक्तं ज्वालामुख्यमयं[14] मनुः[15] ॥१८॥

शतोत्तरं भवेद्विंशद्बीजबद्धो मनुस्स्वयम् ।
अत्रिश्च ऋषिरेवात्र[16] गायत्रीछन्द उच्यते[17] ॥१९॥

ज्वालामुखी देवता च स्तम्भनाय त्रिमूर्त्तिभिः ।
ध्यानं यत्नात् प्रवक्ष्यामि न्यासं पूर्ववदाचरेत् ॥२०॥

---

१. घ. देवीं देवता । २. ख. घ. ह्रीं । ३. घ. ०विद्याः । ४. घ. स्तम्भनी । ५. घ. विश्वरूपिणी । ६. घ. मनूनां संभवेत्येतत् । ७. घ. न्योत । ८. घ. च उच्चार्यं । ९. क. बीज । १०. घ. बीजा । ११. ०बीजा । १२. घ. युग्मं च । १३. घ. नाशययुग्मं च । १४. ख. ज्वालामुख्यास्स्वयं । १५. घ. स्तब्धमामात्रिद्वह्निजाया ज्वालामुखीमनुः । १६. घ. ०रेवास्य । १७. घ. एव च ।

ध्यानं विना भवेन् मूकः सिद्धमन्त्रोऽपि पुत्रक ।
ज्वालापुञ्जसटोन्मुक्तां[1] कालानलसमप्रभाम् ॥२१॥
चिन्मयीं स्तंभनीं देवीं भजेऽहं विधिपूर्वकम् ।
एवं ध्यात्वा जपेन्मन्त्रमर्कलक्षं सुबुद्धिमान् ॥२२॥
तर्पणं च गवां क्षीरैस्तालकेन हुनेत् सदा ।
तर्पणं च चतुर्ल्लक्षं लक्षमेकं हुनेत्सदा[2] ॥२३॥
सहस्रद्वितयं चैव 'ब्राह्मणानां सुभोजयेत्'[3] ।
त्रिमूर्त्ति स्तम्भयेन्मंत्री पञ्चतत्वान्यपि क्षणात् ॥२४॥
आश्चर्यदं महामन्त्रं नराणां दुर्ल्लभं भुवि ।
इदानीं मन्त्रराजं च बृहद्भानुमुखाह्वयम् ॥२५॥
'मारणं स्तंभबाणं'[4] च आश्चर्यं च कलौ युगे ।
तारं ह्लां ह्लीं च उच्चार्य ह्लूं ह्लैं ह्लौं च ततः परम् ॥२६॥
ह्लूस्तथाप्युच्चरेत् पुत्र ह्लां ह्लीं ह्लूं च ततः परम् ।
ह्लैं ह्लौं ह्लूश्च ततश्चोक्त्वा[5] बगलामुखिपदं वदेत् ॥२७॥[6]
सर्वशब्दं ततोच्चार्य दुष्टानां पदमुच्चरेत् ।
वाचं मुखं पदं चोक्त्वा स्तम्भयद्वयमुच्चरेत् ॥२८॥
आद्यबीजं पुनश्चोक्त्वा[7] उद्धरेत् पुनराद्यवत् ।[8]
जिह्वां कीलय उच्चार्यं पूर्ववद् बीजमुद्धरेत् ॥२९॥
बुद्धिं विनाशयोच्चार्य[9] पूर्वबीजानि[10] चोच्चरेत्[11] ।
वह्निजायासमायुक्तो बृहद्भानुमुखीमनुः ॥३०॥[12]
सविता च ऋषिः ख्यातो[13] गायत्रीछन्द एव च ।
देवता स्तम्भनार्थं च बृहद्भानुमुखी तथा ॥३१॥

---

१. घ. ज्वलपुंसजटामुक्त । २. घ. ०सुत । ३. ख. ब्राह्मणान् सुत भोजयेत् । ४. घ. रणस्तम्भनबाणं । ५. घ. ततस्तारं । ६. अतः परमयमंशो दृश्यते घ. पुस्तके—

"आद्यबीजं मनोः संख्या उद्धरेत् पुनरादरात्"

७. घ. मनोः संख्या । ८. घ. पुनरादरात् । ९. घ. नाशय उच्चार्य्यं । १०. घ. पूर्वबीजं । ११. घ. समुच्चरेत् । १२. घ. पुस्तके त्वयमंशो विशेषः—

स्तब्धमाया तारकं च वह्निजायान्तकं सुत ।
बृहद्भानुमुखीमंत्रं षडुत्तरशतार्णवे" ॥

१३. घ. ऋषिश्चात्र ।

बीजं च बगलाबीजं शक्तिर्माया कुमारक ।
कीलकं प्रणवं चात्र विनियोगस्ततः[1] परम्[2] ॥३२॥
पूर्ववन्न्यासविद्यां च तन्त्रराजवदाचरेत् ।
ध्यानं यत्नात् प्रवक्ष्यामि मन्त्रभेदेन पुत्रक ॥३३॥
कालानलनिभां देवीं ज्वलत्पुञ्जशिरोरुहाम् ।
कोटिबाहुसमायुक्तां वैरिजिह्वासमन्विताम्[3] ॥३४॥
स्तम्भनास्त्रमयीं देवीं दृढपीनपयोधराम् ।
मदिरामदसंयुक्तां[4] बृहद्भानुमुखीं भजे[5]॥३५॥
एवं ध्यात्वा जपेन्मंत्रमर्कलक्षं कुमारक ।
तर्प्पयेत्तद्दशांशं च गुडोदकसमन्वितम् ॥३६॥
तालकेन हुनेत्तस्य दशांशं संस्कृताग्निना ।
ब्राह्मणान् भोजयेत् पश्चात् तद्दशांशं कुमारक ॥३७॥
मन्त्रान्ते च प्रकर्त्तव्यं सौभाग्यार्चनमादरात् ।
सौभाग्यार्चां विना पुत्र मन्त्रसिद्धिर्न जायते ॥३८॥
पञ्चास्त्रमन्त्रसिद्धिर्हि दिवि देवेषु दुर्लभा[6] ।
गोपयेत् सर्वदा पुत्र[7] 'गुप्ता वीर्यवती'[8] भवेत् ॥३९॥
'न कर्त्तव्यः प्रयोगोऽस्य'[9] शपथादि[10] कदाचन ।
यः करोति प्रयोगं च देवताशापमाप्नुयात् ॥४०॥

इति षड्विद्यागमे सांख्यायनतन्त्रे षोडशः पटलः ॥१६॥

॥ अथ सप्तदशः पटलः ॥

[11]'जिह्वाग्रमादाय 'करेण देवीं'[12] 'वामेन शत्रून् परिपीडयन्तीम्'[13] ।
पीताम्बरां पीनपयोधराढ्यां[14] सदा 'स्मरेऽहं बगलाम्बिकां'[15] हृदि ॥१॥

क्रौञ्चभेदन उवाच—

चन्द्रचूड नमस्तेऽस्तु इन्दिरापतिपूजित ।
शताक्षरीमहामंत्रं बगलायाश्च मे वद ॥२॥

---

१. घ. विनियोगं च । २. घ. संस्मृतम् । ३. घ. ललज्जिह्वासमन्विताम् । ४. घ. मदिरामोदसंयुक्तां । ५. घ. भजेत् । ६. घ. दुर्लभम् । ७. घ. पुत्रा । ८. घ. गोप्ता वीर्यापतिर् । ९. घ. न कर्त्तव्यं प्रयोगांश्च । १०. ख. घ. आपद्यपि । ११. इतः पूर्वमयमंशो घ. पुस्तके—'हरीहरेश्च समर्था' । १२. घ. करद्वयेन । १३. घ. मुत्पाटयन्तिमरिशक्तियुक्ताम् । १४. घ. पीत० । १५. घ. स्मरेयं बगलामुखीं ।

ईश्वर उवाच—

मन्त्रोद्धारं प्रवक्ष्यामि पुरश्चर्याविधिं तथा ।
प्रयोगं चोपसंहारं वक्ष्येऽहं तव पुत्रक ॥३॥

स्तब्धमायां च वाग्बीजं माया मन्मथमेव च ।
श्रीबीजं[1] शक्तिवाराहं 'वगलामुखि चोच्चरेत्'[2] ॥४॥

स्फुरद्वयं तथा चोक्त्वा सर्वशब्दं[3] ततोच्चरेत् ।
दुष्टानां पदमुच्चार्य वाचं मुखं पदं वदेत् ॥५॥

स्तम्भयद्वयमुच्चार्य प्रस्फुरद्वयमुच्चरेत् ।
विकटाङ्गीपदं चोक्त्वा घोररूपीपदं[4] वदेत् ॥६॥

जिह्वां कीलय उच्चार्य[5] महाशब्दं ततोच्चरेत् ।
पश्चाद्भ्रमकरी चैव बुद्धिं नाशय उच्चरेत् ॥७॥
विरामयपदं[6] चोक्त्वा 'सर्वप्रज्ञामयीति च'[7] ।
प्रज्ञां नाशय उच्चार्य उन्मादीकुरु[8] युग्मकम् ॥८॥

मनोपहारिणीं चोक्त्वा स्तंभमायां[9] समुच्चरेत् ।
शक्तिवाराहबीजं च लक्ष्मीबीजं[10] ततः परम् ॥९॥

कामराजं च हृल्लेखां वाग्भवं तदनन्तरम् ।
स्तब्धमायां ततोच्चार्य वह्निजायासमन्वितम् ॥१०॥

शताक्षरीमहामन्त्रं वगलानाम पावनम् ।
ब्रह्मा ऋषिश्च छन्दोऽस्य गायत्री समुदाहृता ॥११॥

देवता वगलानाम्नी जगत्स्तम्भनकारिणी ।
ह्लीं बीजं शक्तिरित्येवं वाग्भवं कीलकं तथा ॥१२॥

पूर्वोक्तां न्यासविद्यां च वगलापञ्जरादयः ।
न्यासानुक्तक्रमेणैव[11] 'जपाद्यां पंच एव च'[12] ॥१३॥

पीताम्बरधरां सौम्यां पीतभूषणभूषिताम् ।
स्वर्णसिंहासनस्थां च मूले कल्पतरोरधः[13] ॥१४॥

---

१. घ. रमां च । २. ह्लींकारं बगलामुखीं । ३. घ. सर्वं शब्दं । ४. घ. घोररूपं पदं । ५. घ. मुच्चार्य । ६. घ. विराणमयीपदं । ७. घ. सर्वंप्रज्ञामयीत्यरे । ८. घ. उन्मादं कुरु । ९. घ. स्तब्धमायां । १०. घ. रमाबीजं । ११. घ. न्यासमुक्तक्रमेणैव । १२. ख. जपादावाचरेत् सुधीः । घ. जपादावन्त्यमेव च । १३. घ. ०स्तथा ।

वैरिजिह्वाभेदानार्थं[1] छुरिकां[2]बिभ्रतीं शिवाम् ।
पानपात्रं गदां पाशं धारयन्तीं भजाम्यहम् ॥१५॥

एवं ध्यात्वा जपेन्मन्त्रमर्कलक्षं क्षपाशनः ।
तर्प्पयेद्धेतुमिश्रेण वारिणा वाथ पुत्रक ॥१६॥

'जातिपंचकसंमिश्रजलेन'[3] च कुमारक ।
पूजायुतं[4] च सन्तर्प्य ह्यर्चितेन जलेन च ॥१७॥

त्रिमध्वक्तं पायसेन[5] अथवा पायसाज्ययोः ।
चरुणा वा हुनेत् पुत्र[6] सहस्रं तत्त्वसंख्यया ॥१८॥

नानादेहजरोगांश्च कृत्रिमग्रहसंभवान् ।
यावकांश्च[7] प्रयोगांश्च[8] 'तुल्यधातुसमुद्भवान्'[9] ॥१९॥

सद्योनाशनमायान्ति मन्त्रहोमेन साधकः ।
'साज्यसक्तुघृताक्तं'[10] च शमन्तकुसुमेन वा ॥२०॥

षट्सहस्रं हुनेत् पुत्र स्थण्डिले वाथ कुण्डके ।
वशीकरं च संमोहं कीर्त्तिः प्रज्ञा भवेद् ध्रुवम् ॥२१॥

तालकेन हुनेत् पुत्र सहस्रं वसुसंख्यया ।
कुण्डे चैव भगाकारे राजताग्नौ[11] कलौ निशा ॥२२॥

स्तम्भनं च भवेत् पुत्र नात्र कार्या विचारणा ।
अर्क्कैश्च पिचुमंर्द्दैश्च[12] समिधः[13] संग्रहेन्नरः ॥२३॥

प्रत्येकं त्रिसहस्रं च प्रादेशसमिधा क्रमः[14] ।
मन्त्रं सर्वं समुच्चार्य समिधाद्वयमेव च ॥२४॥

हुनेद् ध्यानसमायुक्तः सद्यो विद्वेषणं भवेत् ।
विभीतकस्य समिधो ग्राह्यास्तु[15] त्रिसहस्रकम् ॥२५॥

षट्कोणकुण्डे जुहुयान्निशायां कृष्णपक्षके ।
स्थावरांश्च गिरींश्चैव नदीपादपसंकुलान्[16] ॥२६॥

---

१. घ. ०छेदनार्थं । २. घ. क्षुरिकां । ३. ख. ग. घ. जाती(ति) चंपक० । ४. घ, बाणायुतं । ५. घ. पायसं च । ६. घ. पुस्तकेऽस्मात्परमधिकोंऽशो दृश्यते—
'पर्यायफलदायक । तर्पणेन हुनेत्पुत्र' ।
७.–८. घ. यावकाश्च प्रयोगाश्च . ९. ख. ग. घ. शल्प(ल्य)धातु० । १०. ख. शाली सक्तु० । ग. साज्यसक्तु० । घ. शालिशक्तुघृताक्तां च । ११. घ. रजकाग्नौ । १२. ख. पिचुमर्द्दैश्च । १३. घ. समिधा । १४. ख. ग. प्रादेशसमिधः क्रमः । घ. प्रादेश-समिधा:क्रमात् । १५. क. ग्रहास्तु । ग. ग्रहाशु । १६. घ. नदीपादपसंकुसुमं तथा ।

क्षणादुच्चाटनं कुर्याद् होमस्यास्य प्रभावतः।
निम्बतैलेन संयुक्तं शाल्मलीकुसुमं तथा ॥२७॥[१]

जुहुयाद्देवतां[२] ध्यात्वा[३] मारणं भवति ध्रुवम्।
षट्कर्मनिर्माणमिद[४] सुसिद्धं
शताक्षरीमन्त्रमशेषदुःखहम्।
होमेन संस्तम्भनमाचरेद् बुधो-
विद्यासुसिद्धं मुनिगुह्यमादरात् ॥२८॥

॥ इति षड्विद्यागमे सांख्यायनतन्त्रे सप्तदश[५] पटलम्[६] ॥१७॥

॥ अथ अष्टादशः पटलः ॥

नमस्ते जगतां[७] देवीं जिह्वास्तंभनकारिणीम्।
भजेऽहं शत्रुनाशार्थं[८] साधकासक्तमानसाम्[९] ॥१॥

क्रौञ्चभेदन उवाच—

सम्यग्ज्ञान[१०] महेशान नित्यनित्यस्वरूपक[११]।
चन्द्रचूड नमस्तेऽस्तु प्रयोगं वद मे प्रभो ॥२॥

ईश्वर उवाच—

षट्सहस्रं हुनेत् पुत्र दूर्वाहोममतन्द्रितः।
'सम्यग् विषज्वरं'[१३] हन्ति वगलायाः प्रसादतः ॥३॥

कुशेन जुहुयात्तस्य तापज्वरहरं[१२] परम्।
हुनेत् तावत् श्वेतदूर्वा ज्वरं चातुर्थिकं हरेत् ॥४॥

त्रिमध्ववक्तं[१४] श्वेतदूर्वां षट्सहस्रं हुनेत् क्रमात्।
नानाविधं गरं हन्ति नात्र कार्या विचारणा ॥५॥

दधिमिश्रं गुडूचीभिः शर्करागुडसम्मितम्[१५]।
जुहुयात् षट्सहस्रं तु नानामेहनिवारणम् ॥६॥

---

१. घ. पुस्तके श्लोकोऽयं नास्ति। २. घ. जुहुयादयुतं। ३. घ. ध्यायन्। ४. घ. षट्ककर्माणि मिदं। ५. ग. सप्तदशम। घ. सप्तदशः। ६. घ. पटलः। ७. घ. बगला। ८. घ. शत्रुनाशाय। ९. घ. मदिरासवत०। १०. घ. सत्यज्ञान। ११. घ. नित्यानित्य०। १२. घ. सद्यस्तापज्वरं। १३. घ. शीतज्वर०। १४. घ. त्रिमधुक्ता। १५. ख. मिश्रितम्।

सर्षपं लवणोपेतं पूर्ववज्जुहुयान्नरः ।
नाशयेद् गुलमरोगं[1] च औषधेन विना महत् ॥७॥

षट्सहस्रं हुनेत् पुत्र शर्कराज्यसमन्वितम् ।
'पित्तोद्रेकादिसर्वांश्च[2]' रोगान्नाशयति[3] ध्रुवम् ॥८॥

शालिसक्तुं[4] घृतोपेतं[5] वशीकरणमुत्तमम् ।
लाजाहोमं[6] षट्सहस्रं लभेद्वाञ्छितकन्यकाम् ॥९॥

हरिद्राखंडहोमं[7] तु षट्सहस्रं[8] सुबुद्धिमान् ।
गर्भस्तंभो भवेन्नारी सापि वश्या[9] भवेद् ध्रुवम् ॥१०॥

केतकीदलहोमेन गणिका वश्यमाप्नुयात्[10] ।
हुनेत् पद्मदलेनैव नेत्ररोगं विनश्यति ॥११॥

मल्लिकाकुसुमेनैव अधिका च मतिर्भवेत्'[11] ।
जातीफलेन जुहुयादुन्मत्तो जायते रिपुः ॥१२॥

षट्सहस्रं देवकुसुमं[12] शर्कराज्यसमन्वितम् ।
बुद्धिगं[13] चैव चाञ्चल्यं संज्ञानमुन्मतिस्तथा[14] ॥१३॥

अलीकेन[15] क्षुद्रमतिर्दुर्बुद्धिः सिद्धबुद्धिता[16] ।
तत्क्षणान्नाशमाप्नोति तमः सूर्योदये[17] यथा ॥१४॥

मांसं संपुटसंयुक्तं[18] 'द्रव्येण सममेव च'[19] ।
अयुतं जुहुयाद्रात्रौ सद्यो धनपतिर्भवेत् ॥१५॥

मध्वाक्तं 'छागमांसं च'[20] त्रिसहस्रं हुनेत् सुत ।
'भूलाभं जायते'[21] शीघ्रं ग्रामादिपतिरेव[22] च ॥१६॥

गौडीद्रव्येण जुहुयात् सहस्रं बाणसंख्यया ।
बहुमूत्रादिरोगांश्च नाशयेत्तान्[23] न संशयः ॥१७॥

---

१. ग. रुग्मरोगं । २. घ. पैत्त्योद्भवांश्च शतशो । ३. ०नाशयेद् । ४. ख. ग. घ. शालिशक्तु । ५. घ. सितोपेतं । ६. घ. लाजहोमात् । ७. घ. होमस्तु । ८. क. सहस्रं । ९. ख. वश्या । १०. घ. ०मादरात् । ११. ख. वाधिका शुभमतिर्भवेत् । १२. घ. देवपुष्पं । १३. ख. उद्वेगं । १४. उच्चाटकमतिस्तथा । १५. ख. अविवेक घ. अविवेको । १६. ख. मन्दबुद्धिता । घ. सिद्धिबुद्धिता । १७. घ. सूर्योदयो । १८. ख. तु कुक्कुटस्यैव । घ. कुक्कुटसंभूतं । १९. घ. त्रिमधुः सहितेन । २०. घ. छागपिशितं । २१. घ. सुलभं च भवेच् । २२, घ. ग्रामाधि० । २३. क. ग. घ. नाशयंति ।

माध्वीद्रव्येण जुहुयात् षट्सहस्रं क्रमेण च ।
ज्वरपैक्ष्यादिरोगांश्च[1] सद्यो नाशनमाप्नुयात् ॥१८॥
पैष्टीद्रव्येण जुहुयान्निशास्वष्टसहस्रकम् ।
संग्रहग्रहणीरोगं सद्यो नाशनमाप्नुयात् ॥१९॥
अन्नेन 'अन्वहो हुत्वा'[2] अन्नदानपतिर्भवेत्[3] ।
घृतेन कान्तिमान् भूत्वा[4] नारीणामात्मदो[5] भवेत् ॥२०॥
क्षीरेण भ्रमनाशश्च दध्ना तापननाशनम्[6] ।
पञ्चगव्येन जुहुयात् पूर्ववत् पाप नाशयेत्[7] ॥२१॥
गोमूत्रेण हुनेन्मन्त्री[8] षट्सहस्रं क्रमेण च[9] ।
तालीमद्येन[10] जुहुयात् स्त्रीणामाकर्षणं भवेत् ॥२२॥
खर्जूरजेन द्रव्येण पुंसामाकर्षणं भवेत् ।
तिलतैलेन जुहुयात् सर्वाकर्षणमाप्नुयात् ॥२३॥
एरण्डतैलेन जुहुयाद्[11] वाचाकर्षणमाप्नुयात्[12] ।
कुसुंभतैलहोमेन[13] काकगृध्राननेकशः[14] ॥२४॥
आकर्षणं भवेच्छीघ्रं खेचराः पक्षिजातयः[15] ।
यवना[16] पानहोमेन अग्निमध्याद्रिपुः[17] स्वयम् ॥२५॥
रोगी च जायते मासाच्छिवस्य वचनं यथा ।
जुहुयादारनालेन पित्तरोगी भवेद्रिपुः ॥२६॥
निम्बपत्रद्रवेणैव वातरोगी भवेद्रिपुः ।
मोहिनीपत्रजद्रावैः[18] श्लेष्मरोगी भवेद्रिपुः ॥२७॥

---

१. ग घ. ज्वरपैत्यादि० । २. घ. हुत्वान्नकामी । ३. घ. ०दानपरो० । ४. घ. हुत्वा । ५. नारीणां मन्मथो । ६ घ. तापनिवारणम् । ७. घ. पापशान्तये । ८. घ. हुनेद्धीमान् । ९. घ. पुस्तके विशेषः—

'विदारं विवशो भावाद्रिपुर्भ्रान्तो भविष्यति' ।

१०. ख. तालीमयेन । घ. तालमद्येन । ११. घ. एरण्डतैलहोमेन । १२. घ. गजाकर्षण० ।

१३. ख. ग. घ. पुस्तकेष्वतः परमयमंशो दृश्यते विशेषः—

'पूर्ववद्धोममात्रतः । जलजानां च होमेन[घ. जलजाश्चैव यो भेदा)भवेदाकर्षणं सुत । करंजतैलहोमेन' ।

१४. घ. काकगृध्राण्यनेकशः । १५. घ. पक्षिजा यतः । १६. ख. यवनां । घ. यावतालान्न । १७. घ. अग्निमांद्यं रिपोः । १८. ख. मोहिपत्रजतद्रावैः ।

अर्कपत्रद्रवेणैव क्षयरोगी भवेद्रिपुः ।[1]
'वज्रीक्षीरेण संयुक्तमारनालेन'[2] पुत्रक ॥२८॥
जुहुयात् षट्सहस्रं तु वगलाध्यानपूर्वकम् ।
नाडीव्रणसमायुक्तो[3] (:) षण्मासान्म्रियते रिपुः ॥२९॥
गरं[4] च तिलतैलं च आरनालयुतेन च ।
'ग्रामे वा नगरे वाथ[5] वगलाध्यानपूर्वकम् ॥३०॥
'स्फोटव्रणाश्च जायन्ते'[6] रिपोर्योजनमात्रतः[7] ।[8]
तिलतैलेन संयोज्य यावनालान्नमेव[9] च ॥३१॥
जुहुयात् पूर्ववच्छत्रु[10]र्मण्डलाच्छिन्नशीर्षकः[11] ।
कर्पूरमिलितं[12] चैव तिलतैलं हुनेत् सुधीः[13] ॥३२॥
मारणं[14] मण्डलाच्छत्रो[15]र्नात्र कार्या विचारणा ॥३४॥

इति षड्विद्यागमे सांख्यायनतन्त्रे अष्टादशःपटलः ॥१८॥

॥ अथैकोनविंशः पटलः ॥

चतुर्भुजां त्रिनयनां पीतवस्त्रधरां शुभाम्[16] ।
वन्देऽहं वगलां देवीं शत्रुस्तंभनकारिणीम् ॥१॥

---

१. सप्तविंशतिपद्योत्तरार्द्धस्याष्टाविंशतिपद्यपूर्वार्द्धस्य च स्थानेऽयमंशो लभ्यते घ. पुस्तके–
'पत्रं विभीतकोद्भूतं तस्य स्वरसहोमतः
जातिभ्रष्टो भवेच्छत्रुर्नान्यथा शिवभाषितम् ॥
तत्कारिपत्रजद्रावैः कर्मभ्रष्टो भवेद्रिपुः ।
निर्गुण्डीपत्रजद्रावैर्ज्वररोगी भवेद्रिपुः ॥
कर्पासपत्रजद्रावैर्होमेन कुमारक ।
बद्धकोष्ठाश्च रोगस्य स्वभावेनैवसिद्धयति ॥
हरीतकीश्च होमेन व्रणरोगी भवेद्रिपुः ।

२. घ. वज्रक्षीरेण संमिश्र० । ३. घ. नाडीव्रणपरो भूत्वा । ४. घ. अगरं । ५. घ. पुस्तके विशेषः—
नगरे वाथ ग्रामे वा अर्कक्षीरं चारनालं पूर्ववज्जुहुयात् क्रमात् ।
भगंदरव्रणो भूत्वा षण्मासान् म्रियते रिपुः ॥

६. घ. फोटकव्रहा रोगेन । ७. घ. रिपुर्यो० । ८. अतः परमंशः ख. घ. पुस्तके विशेषः
'म्रियते नात्र सन्देहः शिवस्य वचनं यथा ।

क. ख. पावनालान्नमेव १०. घ. पूर्ववत्पुत्र । ११. ख. ग. छिन्नसंशयः । घ. ०शत्रुमारणम् । १२. घ. ०मिश्रितं । १३. घ. सुत । १४. घ. म्रियते । १५. घ. च्छत्रु । १६. घ. शिवाम् ।

स्कन्द[1] उवाच—

नमस्ते योगिसंसेव्य नमः[2] कारुणिकोत्तम ।
प्रयोगं चोपसंहारं वद मे सर्वमङ्गल ॥२॥

ईश्वर उवाच—

प्रेताङ्गारमर्षी[3] कृत्वा सितवस्त्रेण[4] बुद्धिमान् ।
शल्यं[5] तदन्तरे भस्म वैरिनाम[6] च संलिखेत् ॥३॥
'एकार्णां बगलां देवीं[7] ' वेष्टयेत् सम्यगादरात् ।
'शताक्षरीं च संवेष्टय ईशानादिषु[8] ' वेष्टयेत् ॥४॥
तद्वस्त्रं[9] गुलिकीकृत्य[10] वेष्टयेत् प्रेतरज्जुना ।
भौमवारे समानीय स्थापयेद् वृक्षकोटरे ॥५॥
वृक्षमूले जपेन्मन्त्रममुं ध्यानपूर्वकम् ।
पुत्रदारादिसंयुक्तः पक्षाच्छत्रुर्मृतो भवेत् ॥६॥
भूर्जपत्रे[11] लिखेन्नाम[12] वगलाबीजमध्यमम् ।
कोटरे स्थापयेत् पुत्र विभीतकतरोस्तथा ॥७॥
जिह्वास्तम्भं भवेच्छत्रोः पक्षमात्रेण पुत्रक ।
बृहस्पतिसमो वापि वाचस्पतिसमोऽपि वा ॥८॥
तालमध्ये लिखेन्नाम वगलाबीजमध्यमम्[13] ।
प्राणप्रतिष्ठां कृत्वाऽथ[14] निर्दहेद्[15] दीपवह्निना ॥९॥
जपेत्तत्र सहस्रैकं शताक्षरमनुं[16] तथा ।
जिह्वांस्तंभं भवेच्छीघ्रं[17] शेषभाषापतिः स्वयम् ॥१०॥
प्रेतभाण्डे लिखेन्नाम प्रेताङ्गारेण[18] साधकः ।
प्राणस्थापनकं कृत्वा रवौ रात्रौ सुबुद्धिमान् ॥११॥
प्रेताग्नौ प्रेतकाष्ठे तु[19] निर्द्दहेत् प्रेतकानने ।
नग्नः श्मशानमध्ये तु जपेद् दक्षिणदिङ्मुखः ॥१२॥

---

१. घ. क्रौञ्चभेदन । २. घ. महा । ३. ख. ०मयीं । घ. मर्शि । ४. घ. प्रेत-वस्त्रे च । ५. ख. ग. घ. शल्पं । ६. घ. अरि० । ७. घ. एकाक्षरीं च वगलां । ८. घ. मंत्रशताक्षरींभिश्च ईशान्ये दिक्षु । ९. क. घ. तद्वस्त्र । १०. घ. गुटिकीकृत्य । ११. ग. घ. भूर्यपत्रे । १२. घ. रिपुर्नाम । १३. ख. ग. घ. ०मध्यगम् । १४. घ.० तु । १५. ग. निर्देही । १६. घ. शताक्षरिमनु । १७. ०च्छत्रोः । १८. प्रेतांमारणे १९. घ. पु ।

सहस्रं ध्यानपूर्वं तु प्रातर्यामे समासतः[1] ।
एवं कृत्वा तु[2] सप्ताहं ज्वरस्थो जायते भुवि ॥१३॥
मासान्मृत्युवशो[3] भूत्वा विनश्यति न संशयः ।
श्रीसूक्तमार्जनेनैव तन्मन्त्रेणाभिमन्त्रितम् ॥१४॥
शतमष्टोत्तरं चैव[4] सहस्रं वा कुमारक ।
मंत्रितोदकपानेन पुण्यं सुखमवाप्नुयात् ॥१५॥
चिताभस्म[5] चिताङ्गारं चितान्नं[6] च कुमारक ।
मोहिनीपत्रजद्रावैर्मर्द्दयेत् सूक्ष्मतोऽनघ ॥१६॥
समं समं रिपूच्छिष्टं मर्द्दयेत् कल्पयेत् पुनः ।
'चतुरङ्गुलां पुत्तलीं'[7] कुर्यात् सर्वाङ्गसंयुताम् ॥ ७॥
हृदि तन्नाम चालिख्य ललाटे वगलां लिखेत्
सर्वाङ्गे चाग्निबीजं च लिखेद् बिन्दुं च निर्द्दहेत् ॥१८॥
प्रेतवह्नौ प्रेतकाष्ठे प्रेतमांसं सुपुत्रक[8] ।
जपेत्त्रायुतं पुत्र रिपुर्गच्छेद्यमालये[9] ॥१९॥
स्नुह्या[10]क्षीरेण संयुक्तं 'मर्द्दयेत् श्वेतसर्षपैः'[11] ।
चतुरङ्गुलपुत्तल्यां लिखेत् पूर्ववदाचरेत् ॥२०॥
'स्थापयेच्चुल्ल्यधोभागे'[12] यमघंटकयोगतः ।
तत्रोपरि दिवारात्रौ अग्निं संस्थाप्य बुद्धिमान् ॥२१॥[13]
बगलाबीजमध्यस्थं साध्यनाम च संलिखेत् ।
वेष्टयेद्बगलामन्त्रं ईशानादिशताक्षरम्[14] ॥२२॥
प्राणप्रतिष्ठां कृत्वा तु संहारक्रमतोऽर्चयेत् ।
शताक्षर्यर्कक्षीरैस्तु स्नुहीक्षीरेण लेपयेत् ॥२३॥[15]

---

१. घ. समापयेत् । २. घ. नु । ३. क.ख.ग. ०वशे । ४. घ. वाथ । ५. घ. चितिभस्म । ६. घ. प्रेतान्नं । ७. घ. चतुरं पुत्तलीं चैव । ८. घ. च पुत्रक । ९. ख. ग. घ. ०यमालयम् । १०. घ. स्नुही । ११. घ. श्वेतसर्षप मर्द्दयेत् । १२. घ. ०चुल्ल्य० । १३. ख. घ. पुस्तकस्थोऽयमंशो विशेषः—

अयुतं च दिवारात्रौ एकाक्षरमनुं जपेत्
मसूरिकाज्वराच्छत्रुः पक्षान्मरणमाप्नुयात् ।
अर्कपत्रे लिखेन्नाम अर्कक्षीरेण बुद्धिमान् ।

१४. घ. ईशान्यादि० । १५. ख. ग. घ. पुस्तकेषु निम्नांशो विशेषः—

संतपेद्दीपशिखया पुत्तलीं तां विशेषतः ।
अष्टोत्तरशतं कृत्वा शताक्षर्यादि कल्पयेत् ॥

एवं कृते सप्तरात्रं स शत्रुश्च मृतो भवेत् ।
मसूरिकाजरासक्तः पक्षाद् गच्छेद् यमालयम् ।।२४।।
मन्त्रयेन्निम्बपत्रेण एकमेकं क्रमं क्रमम् ।
चन्द्रप्रसादमन्त्रेण शीतलाविद्यया तथा ।।२५।।[1] ।।

सपर्णा[2] क्षालयेत् क्षीरैः सदाहः शान्तिमाप्नुयात् ।[3]
तिक्तकोशातकीजातिः[4] तापिच्छी सादरं तथा ।।२६।।

धत्तूरकं च तन्मूर्द्धनि 'कारवेल्या फलाकृतिम्'[5] ।
'षट्मनःशिलाबीजैश्च'[6] ति् पादद्वयं तथा ।।२७।।

बदरीमूलतो गत्वा प्राणस्थापनकं चरेत् ।
मन्त्रमुच्चारयेत्पुत्र तदन्तः शत्रुमुच्चरेत् ।।२८।।[7]

श्रोत्रालीगण्डभ्रूमध्ये जिह्वानासास्यशेफसौ[8] ।
'दक्षिणाभिमुखो भूत्वा'[9] वगलासम्पुटद्वयम्[10] ।।२९।।

ब्रह्मस्थाने तालुदेशे कण्टकानर्कसंख्यया ।
'दक्षिणाभिमुखो भूत्वा'[11] रोपयेन्नग्नतस्तथा[12] ।।३०।।

पञ्च पञ्च करे रोप्य पार्श्वे कुक्षौ च पृष्ठके ।
कण्टकान् सप्तसंख्याकान् 'मन्त्रयेत् पूर्ववत् क्रमात्'[13] ।।३१।।

रोपयेत् पादयुग्मे तु प्रत्येकं[14] द्वादशं तथा ।
'मन्त्रपूर्वं च संरोप्य'[15] वदरीकण्टकांस्तथा ।।३२।।

पुत्तलीं प्रेतवस्त्रेण बद्ध्वा प्रादेशगर्भके[16] ।
श्मशानाग्नौ[17] क्षिपेद्[18] रात्रौ बलिं दद्याच्च कुक्कुटम्[19] ।।३३।।

---

१. अतः परमयमंशोऽवलोक्यते घ. पुस्तके—
"एकाक्षरीविद्यया च शताक्षर्या च विद्यया" ।

२. सुपर्णान् । ३. घ. पुस्तस्के निम्नांशो दृश्यते
मंत्रितं जुहुयान्मंत्री क्षीरे वापि तथैव च ।
सप्ताहाच्छान्तिमाप्नोति तमः सूर्योदये तथा ।।

४. घ. जाती । ५. ख. कारवेल्य० । घ. कारवल्या० । ६. ख. ग. षट्शिलां निबबीजैश्च । घ. षट्छितां निम्बपत्रैश्च । ७. घ. पुस्तके विशेषः पाठः—
कंटकान्तो (न्ता)पयेदर्कनेत्राद्यंगेषु पुत्रक ।

८. घ. ०शेफसोः । ९. क. ग. घ. पुस्तकेषु नास्ति । १०. घ. पुस्तके नास्ति । ११. घ. दक्षिणाभिमुखं स्थित्वा । १२. घ. ०न्नग्नतो रवौ । १३. घ. रोपयेन्मन्त्रपूर्वकम् । १४. घ. द्वादश । १५. घ. मंत्रपूर्वान् समारोप्य । १६. घ. ०गर्त्तके । १७. घ. श्मशाने । १८. घ. निक्षिपेद् । १९. घ. कुक्कुटम् ।

अश्मर्यदं[1] रिपोरङ्गे नाडीशूलं भवेद् ध्रुवम् ।
तेनैव दुःखितः शत्रुः पश्चाद् गच्छेद् यमालयम् ॥३४॥

वक्ष्येऽहं चोपसंहारं जीवस्थोऽपि रिपुं[2] (पुर्) यथा[3]।
रवौ रात्रौ बलिं दत्वा[4] चानीत्वा[5] साधकोत्तमः ॥३५॥

उत्पाट्य कण्टकान्यादौ[6] क्षीरेण क्षालयेत् सुत ।
तच्छलाकां[7] च[8] संक्षाल्य निःक्षिपेत् कूपमध्यगे ॥३६॥

निःक्षिपेन् मन्त्रपूर्वं च एकैकं चोत्तरामुखः[9] ।
शल्वकेनैव[10] मन्त्रेण मन्त्रयेत् कलशोदकम् ॥३७॥

सहस्रवारं विधिवन्[11] मंत्रेण[12] वारिभिः क्रमात् ।
प्रयोगं[13] पीडितं[14] तेन मार्जयेच्छाम्भवेन[15] तु ॥३८॥

स्थापयेत्[16] तेन मंत्रेण मन्त्रसिद्धिस्तु पुत्रक ।
ताम्रपात्रे नदीतोये[17] नदीवेगाग्रवेष्टितः[18] ॥३९॥

'तस्मिश्च मन्त्रयेत् साध्यं मन्त्रैणैव शतं तथा'[19] ।
त्रिकालं प्राशयेत्तोयं मध्याह्ने मार्जनं तथा ॥४०॥

त्रिदिनं चाथवा पञ्च ऋषिसंख्यादिनेषु च[20] [21] ।
एवं कृते पीडितस्य[22] 'पीडा सूर्योदये यथा'[23] ॥४१॥

'संहरेच्छान्तिमाप्नोति तमः सूर्योदये यथा'[24] ।
न ज्ञात्वा चोपसंहारं यः करोति नराधमः ॥४२॥

स जीवन्नेव चाण्डालो मृतः श्वानो भविष्यति[25] ।
प्रयोगं चोपसंहारमभ्यसेच्च कुमारक ॥४३॥

इति षड्विद्यागमे सांख्यायनतन्त्रे एकोनविंशः[26] पटलः ॥१९॥

---

१. ख. अश्मर्षदं । घ. अर्चयेत्तं । २. घ. रिपु । ३. घ. यदा । ४. घ. दद्या । ५. ख. नीत्वा सा । घ. दानीतं । ६. घ. कण्टकान् सर्वा । ७-८. घ. तलालटं तु । ४. घ. चोत्तरं मुखम् । १०. ख. ग. शांभवेनैव । घ. शालुवेशेन । ११. विधिना । १२. घ. मंत्रितं । १३. ख. घ. प्रयोग । १४. घ. मुदितं । १५. घ. शालुवेन । १६. घ. तर्पयेत् । १७. घ. तोयं । १८. घ. नदीवेगान्निवेशितम् । १९. घ. मंत्रयेत् शल्यमंत्रेण शतवारं सहस्रकम् । २०. घ. वा । २१. घ. पुस्तके विशेषः पाठः—

देवता शान्तिमाप्नोति तमः सूर्योदये यथा

२२. घ. तस्य पीडा । २३. घ. शान्तिमाप्नोति निश्चितम् । २४. घ. पुस्तके नास्ति । २६. घ. भिजायते । २६. घ. एकोनविंशतिमं ।

।। अथः विंशः पटलः ।।

सर्वावयवशोभाढ्यां[1] समपीनपयोधराम् ।
हृदि संभावये[2] देवीं वगलां सर्वसिद्धिदाम् ।।१।।

स्कन्द[3] उवाच—

नमस्ते पार्वतीनाथ नमः पन्नगभूषण ।
परविद्याभेदनं च वगलायाश्च मे वद ।।२।।

ईश्वर उवाच

मन्त्रोद्धारं प्रवक्ष्यामि मन्त्रसंभेदनाविधिम् ।
प्रयोगं चोपसंहारं शृणु सर्वं कुमारक ।।३।।

उद्धरेत्तारमादौ तु स्तब्धमायां ततः परम् ।
श्रीर्मायां शक्तिवाराहं 'वाग्भवं मन्मथं तथा'[4] ।।४।।

विलिखेत्तार्क्ष्यबीजं[5] च वगलामुखी[6] समुच्चरेत् ।[7]
परप्रयोगमुच्चार्य ग्रसयुग्मं 'ततः परम्'[8] ।।५।।

पूर्ववन्नवबीजं च ब्रह्मास्त्रपदमुच्चरेत् ।
रूपिणीपदमुच्चार्य परविद्यापदं[9] वदेत् ।।६।।

ग्रसनीति[10] पदं चोक्त्वा भक्षद्वितयमुच्चरेत्[11] ।
पूर्ववन्नवबीजं च परप्रज्ञापदं वदेत् ।।७।।

हारिणीति पदं चोक्त्वा 'प्रज्ञाख्यातियुगं वदेत्'[12] ।
पूर्ववन्नवबीजं च स्तम्भनास्त्रपदं वदेत् ।।८।।

रूपिणीपदमुच्चार्य बुद्धिं 'वाचायुगं वदेत्'[13] ।
पञ्चेन्द्रियपदं चोक्त्वा ज्ञानं भक्षद्वयं वदेत् ।।९।।

पूर्ववन्नवबीजं च बगलामुखि उच्चरेत् ।
हुँ फट् स्वाहा'समायुक्तं वगलामंत्रमुत्तमम्'[14] ।।१०।।

शतोत्तारं मंत्रबीजमष्टाविंशतिरेव च ।[15]
ब्रह्मा ऋषिश्च छन्दोऽस्य गायत्री समुदाहृता ।।११।।

---

१. घ. ०शोभाढ्यां । २. क. संभावयवे । ३. घ. क्रौञ्चभेदन । ४. घ. वाराहं वाग्भवं स्मर । ५. घ. संलिखे० । ६. ०मुखि । ७. घ. वोच्चरेत् । ८. घ. ततोच्चरेत् । ९. घ. ०परं । १०. घ. गसतीति । ११. घ. भक्षयद्वय० । १२. घ. प्रज्ञां भ्रंशययुग्मकम् । १३. घ. विनाशययुग्मकम् । १४. घ. स्वाक्षिचंद्रवर्णाढ्यं मंत्रमुत्तमम् । १५. पदद्वयमिदं नास्ति घ. पुस्तके ।

परविद्याभक्षणी च वगला देवता स्वयम् ।
अत्र प्रयोगं वक्ष्यामि मंत्रस्यास्य कुमारक ॥१२॥
पाशाङ्कुशेनान्तरितः शक्तिबीजेन[1] विन्यसेत् ।
'तत्तद्वागीश्वरीबीजैस्तद्वच्छ्रींबीजतो न्यसेत्'[2] ॥१३॥
लघुषोढां च विन्यस्य क्रमादेव कुलेश्वरी ।
ध्यानं यत्नात् प्रवक्ष्यामि क्रौञ्चभेदनकोविद ॥१४॥
सर्वमन्त्रमयीं देवीं सर्वाकर्षणकारिणीम् ।
सर्वविद्याभक्षणीं[3] च भजेऽहं विधिपूर्वकम् ॥१५॥
एवं ध्यात्वा जपेन्मंत्रं लक्षमेकं क्षपाशनः ।
तर्पयेदासवेनैव तद्दशांशं कुमारक ॥१६॥
छागमांसेन जुहुयान् मध्वाज्येन[4] समन्वितम् ।
खण्डमामलकप्रस्थमयुतं[5] च कुमारक ॥१७॥
योगिनीं वीरपूजां च ह्याचरेच्च समादरात् ।
मंत्रसिद्धिर्भवेत्तत्र नात्र कार्या विचारणा ॥१८॥
परप्रयोगकालेषु[6] मन्त्रमेतं[7] कुमारक ।
'सहस्रत्रितयं जप्त्वा'[8] स शत्रुरवशिष्यते ॥१९॥
शत्रवश्च पुरश्चर्यां यत्र कुर्वन्ति पुत्रक[9] ।
तत्रायुतं जपं कुर्यात् तत्र विघ्नं प्रजायते ॥२०॥
यत्र कुत्रापि रिपवस्तपः कुर्वन्ति निश्चलात् ।
तत्रायुतं जपेन्मंत्रं ग्रसते[10] परविद्यया[11] ॥२१॥
अयुतं तस्य मन्त्रन्तु[12] अभिमन्त्र्य[13] फलं भवेत् ।
द्रव्याभिमानिनो ये च ये च विद्याभिमानिनः ॥२२॥
रूपाभिमानिनो ये च 'ये च'[14] यौवनमानिनः ।
यत्र कुत्रापि तिष्ठंति मंत्रमेतं कुमारक ॥२३॥

---

१. घ. शक्तिबीजं च । २. घ.
ततो नागीश्वरी तद्वच्छ्रीबीजं च ततो न्यसेत् ।
३. ०ख. घ. भक्षिणीं । ४. घ. माध्वाज्येन । ५. घ. ०प्रस्थमयुतं । ६. घ. तु ।
७. घ. ०मेनं । ८. घ. सहस्रत्रितयान् पुत्र । ९. क. ग. निपुत्रक । १०. घ. ग्रस्ते ।
११. घ. रिपुविद्यया । १२. घ. मंत्रस्य । १३. घ. अग्निमंत्य । १४. घ. नास्ति ।

परविद्याभक्षणाख्यं[१] मंत्रं चैवायुतं जपेत् ।
श्वेतकेशान्[२] समायांति दन्तशून्यो भवेद्रिपुः ॥२४॥
सद्यो यौवनहीनं[३] तु[४] 'तमः सूर्योदयं यथा'[५] ।
रूपवान् व्रणयोगी च भवत्येव न संशयः ॥२५॥
जात्याभिमानिनो ये च 'निन्दको भवति ध्रुवम्'[६] ।
'तपोऽभिमानिनो ये च'[७] अङ्गहीनो विजायते[८] ॥२६॥
वैदिकं च परित्यज्य विपरीतकृतं[९] भवेत् ।
विद्याभिमानिनः सर्वेऽप्ययुतं[१०] जपमाचरेत्[११] ॥२७॥
भवेद्विद्याविहीनोऽपि मुष्करो[१२] भवति ध्रुवम् ।
देहाभिमानी पुरुषो नष्टदेहो भवेद् ध्रुवम् ॥२८॥[१३]
दौर्भाग्येन समायुक्तः[१४] सर्वं सम्मोहनं भवेत् ।
एतन्मंत्रस्य माहात्म्यं न जानन्ति ऋषीश्वराः ॥२९॥
'सर्वे स्वं'[१५] देहजं मह्यं[१६] स्वप्रभावात्[१७] प्रकाशिनी ।
योगाभ्यासो[१८] योगसिद्धो[१९] तपस्वी सत्यवादिनः ॥३०॥
मंत्रेण[२०] सिद्धोऽसिद्धोऽपि यत्र प्रत्येति[२१] पुत्रक ।
परविद्याभेदनं च मंत्रोपासनतत्परः ॥३१॥
यत्र गत्वा समासीन एतन्मन्त्रायुतं जपेत् ।
'योगसिद्धो मंत्रसिद्धस्तपस्वी शतजीविनः'(तः)[२२] ॥३२॥
महाक्रान्तो[२३] भवेन्नो चेन्निन्दकोऽपि भवेद् ध्रुवम् ।
ये ये[२४] तन्मन्त्रराजं च नित्यमष्टोत्तरं जपेत् ॥३३॥
'एतद्राज्यं स मासेन'[२५] अम्बासेवापरो[२६] भवेत् ।
न तत्समधिको[२७] भूयान्नैव द्वेषकरो भवेत् ॥३४॥

---

१. घ. ०भक्षणार्थं । २. घ. श्वेतकेशाः । ३. घ. ०हीनः । ४. घ. च । ५. घ. भवत्येव न संशयः । ६. घ. पुस्तके नास्ति । ७. घ. नास्ति । ८. घ. पि जायते । ९. घ. विपरीतक्रमो । १०. घ. सर्वं प्ययुताज् । ११. घ. जपमासुत । १२. ख. घ. सूकरो । १३. ख. घ. पुस्तकस्थः पाठोऽयं विशेषः—

द्रव्याभिमानी पुरुषो नष्टद्रव्यो भवेद् ध्रुवम् ।

१४. घ. समायुक्तं । १५. ख. सर्वस्वं । १६. घ. मोहं । १७. घ. स्वप्रकाशात् । १८. घ. योगाभ्यासे । १९. घ. योगसिद्धिः । २०. घ. यंत्रेण । २१. घ. तिष्ठति । २२. घ. योगसिद्धस्तपस्वी च मंत्रसिद्धः समीपतः । २३. ख. ग. मदाक्रान्तो । घ. पापाक्रान्तो । २४. घ. ए । २५. घ. तद्राज्यं च जनाः सर्वे । २६. घ. वश्याः सेवा० । २७. घ. ०समाधिको ।

नैव निन्दाकरो भूयाद् 'यदीच्छेद्वै च(च्चेत्स्व)जीवितम्'[1] ॥

॥ इति षड्विद्यागमे सांख्यायनतन्त्रे विंशतिः[2] पटलः ॥२०॥

॥ अथैकविंशः पटलः ॥

परप्रज्ञोपसंहारीं[3] परगर्वप्रभेदिनीम्[4]।[5]
परविद्याकर्षणं[6] च प्रयोगं वद शङ्कर ॥१॥

ईश्वर उवाच—

विश्वमेतद्भक्तिमयं[7] 'सा भक्तिर्वगलामया'[8] ।
'एतच्च भासमानां'[9] तां वगलां च कुमारक ॥२॥
वाङ्मयं चैव वैचित्र्यं त्रिषु लोकेषु वर्त्तते ।
तद्गर्वहरणार्थं च विद्यामेतां कुमारक ॥३॥
मनसा 'तं जपन्मन्त्रं'[10] मुखं तस्यावलोकयेत् ।
भयं च विस्मृतिर्भ्रान्तिस्तत्क्षणाद् भवति ध्रुवम् ॥४॥
पानपात्रं वैरिजिह्वां गदां शूलेन संयुताम् ।
पीतवर्णां मदाघूर्णां चिन्तयेदाननं रिपोः ॥५॥
स तु भाषापतिः साक्षाद् बृहस्पतिरिव स्वयम् ।
'स तु जात्यंतरो,'[11] भूत्वा निन्दितो भवति ध्रुवम् ॥६॥
अस्त्रशस्त्रमयं मन्त्रं यो जानाति कुमारक ।
तत्र गत्वा महामन्त्रं जपेद्देवीमनन्यधीः[12] ॥७॥
त्रिसहस्रं ध्यानयुक्तं तस्य विद्या कुमारक ।
विस्मृतिश्च भवेच्छीघ्रं नात्र कार्या विचारणा ॥८॥
अत्यन्तैश्वर्य्यसंयुक्तो[13] द्विषता[14] वर्तते[15] यदि ।
तस्य गेहे[16] भौमवारे निशि नग्नेन बुद्धिमान् ॥९॥

---

१. घ. यदीच्छेज्जीवनं भुवि । २. घ. परविद्याप्रयोगन्नाम विंशतिः । ३. घ. प्रज्ञापहरणी । ४. घ. ०प्रभेदनी । ५. ख. ग. घ. पुस्तकेषु निम्नांशो विशेषः—

परविद्याभक्षिणीं तां बगलां हृदि भावयेत् ।
स्कंद (घ. क्रोञ्चभेदन) उवाच ॥
नमस्ते योगिसंसेव्य योगिराज नमो नमः ।

६. घ. ०कर्षणीं चं । ७. घ. ०च्छक्तिमयं । ८. घ. तच्छक्तिर्वगलाह्वया । ९. ख. एतत्प्रभासमानां । घ. एकत्र भासमानां । १०. घ. च जपेन्मंत्रं । ११. घ. सद्यो जाड्यतमो । १२. घ. जपेद्भूवि० । १३. घ. ०संयुक्तं । १४. ख. द्विषितो । घ. द्विषतो । १५. घ. वर्त्तये । १६. घ. गेहं ।

प्रदक्षिणत्रयं कृत्वा दिशि कौबेरदिङ्मुखः ।
सहस्रं सप्तरात्रौ[1] च नष्टद्रव्यो भवेद् ध्रुवम् ॥१०॥
ग्रामं वा नगरं वाथ नित्यं कृत्वा प्रदक्षिणम् ।
जपेदयुतसंख्या तु[2] तद्ग्रामं तु[3] कुमारक ॥११॥
सस्यादिभिर्विनश्यन्ति द्रव्यं[4] चौरेण नश्यति ।
पशुभिर्म्रियते पुत्र मासाद्दौर्भाग्यमाप्नुयात् ॥१२॥
फलितं पुष्पितं चैव[5] शत्रोरारामाश्रितः ।
रवौ रात्रौ निशाकाले नग्नो भूत्वा सुनिश्चयः[6] ॥१३॥
प्रदक्षिणत्रयं कृत्वाप्ययुतं जपमाचरेत् ।
वृक्षो निर्मूलमाप्नोति शिवस्य वचनं यथा ॥१४॥
एकाक्षरीं च बगलां साध्याख्यं[7] मध्यदेशतः ।
चिन्तयेज्जाप्यकालेषु[8] सहस्रं जपमाप्नुयात्[9] ॥१५॥
लक्षं जप्त्वा मनोरेवं मृत्तिकां च कुमारक ।
प्रवाहोपरि निःक्षिप्य नद्या उपरि बुद्धिमान् ॥१६॥
स्तम्भयेत्तं नदीवेगं महदाश्चर्यकारणम् ।
महानद्यामेवमेव कुर्यात्तं[10] गुरुलाघवान्[11] ॥१७॥
व्यालव्याघ्रादयश्चैव ये ये क्रूरमृगादयः ।
त्रिसप्तमन्त्रितं भस्म मूर्द्धनि क्षेपणमात्रतः ॥१८॥
वाक्पाणिवदनाक्ष्णां च[12] तत्क्षणात् स्तम्भनं भवेत् ।
मन्त्रयेत् संस्कृतं भस्म मन्त्रेणानेन पुत्रक ॥१९॥
अष्टोत्तरशतं सम्यक् ध्यानमात्रेण[13] बुद्धिमान् ।
सर्वाङ्गोद्धूलनं कुर्यात् तद्भस्मना[14] कुमारक ॥२०॥
वनेचरास्तामसजन्तवश्च चौराग्निदुष्कर्मकृदल्पहानपि[15] ।
प्रेताश्च[16] भूताश्च[17] पिशाचभूचराः[18] सिंहाश्च संस्तंभयति ध्रुवं च[19] ॥२१॥

---

१. घ. सप्तरात्रं । ग. सदा रात्रौ । २. ख. घ. क । ३. घ. च । ४. घ, धनं । ५. घ. ०चापि । ६. घ. शु निश्चितम् । ७. ख. ससाध्वं । घ. साध्यास्व । ८. घ. ०काल तु । ९. ख. घ. ०जपमाचरेत् । १०. घ. कुर्यातद् । ११. घ. ०लाघवात् । १२. घ. ध्रि । १३. घ. ध्यानपूर्वं सु । १४. ख. तद्भस्मेन । १५. घ. चौरादिदुष्कर्मकरा नराश्च । १६. घ. प्रेतांश्च । १७. भूतानपि । १८. भूचरांश्च । १९. क. ख. ग. च ध्रुवम् ।

एतन्मन्त्रवरं पुत्र मनसा जपमाचरेत् ।
वादार्थं चाथ वाणिज्यं सभायां राजसन्निधौ ॥२२॥
गत्वा तु रिपवः सर्वे जिह्वास्तंभनमाप्नुयात् ।
'शत्रुमुद्दिश्य मन्त्रं च अयुतं प्रजपेत्ततः'[1] ॥२३॥
पक्षमात्राद् भवेच्छत्रोर्जिह्वास्तंभनमाप्नुयात् ।
तेनैव म्रियते शत्रुर्मण्डलार्धेन[2] मानवः ॥२४॥
दक्षिणामूर्त्तिमन्त्रेण मन्त्रितं जलमादरात् ।
त्रिकालं चैव पीत्वा तु मण्डलाच्छान्तिमाप्नुयात् ॥२५॥

इति षड्विद्यागमे सांख्यायनतन्त्रे एकविंशतिः[3] पटलः ॥२१॥

॥ अथ द्वाविंशः पटलः ॥

नमस्ते देवदेवेशीं जिह्वास्तम्भनकारिणीम् ।
पानपात्रगदायुक्तां भजेऽहं वगलामुखीम्[4] ॥१॥

स्कन्द[5] उवाच—

त्रिपुरारे त्रिलोकज्ञस्त्रिकालात्मं[6]स्त्रियंबक ।
वगलास्त्रं वदास्माकं 'मयि वात्सल्यगौरवात्'[7] ॥२॥

शिव[8] उवाच—

वगलास्त्रमिदं पुत्र[9] सुरासुरसुपूजितम् ।
अगस्त्यः प्रोक्तवान् पूर्वं रामं दाशरथिं प्रति ॥३॥
तेनोक्तमाञ्जनेयाय तेनोक्तं चार्जुनं प्रति ।
तद्विद्यां च प्रवक्ष्यामि वगलाहृदयं[10] मनुम्[11] ॥४॥
प्रथमं वगलाबीजं वाराहं तदनन्तरम्[12] ।
'मम शत्रूंस्ततः शक्ति'[13] वगलाबीजमुद्धरेत् ॥५॥
वगलामुखिपदं चोक्त्वा 'वाचं मुखं'[14] पदं वदेत् ।
ग्रसद्वयं[15] च उच्चार्य खाफीयुग्मं[16] ततः परम् ॥६॥

---

१. घ.—'प्राप्नुयाच्छत्रुमुद्दिश्य तन्मंत्रं प्रजपेत्ततः' ।
२. क. ०मंडलार्थेन । ३. घ. परविद्याकर्षणं नाम एकविंशतिः । ४. घ. बगलाम्बिकाम् । ५. घ. क्रौंचभेदन । ६. घ. ०कालज्ञ । ७. घ. मानवात्सल्यगौरवान् । ८. घ. ईश्वर । ९. घ. मंत्रं । १०. घ. बगलास्त्रमिदं । ११. घ. मनु । १२. घ. च ततः परम् । १३. घ. ततश्च शक्तिवाराहं । १४. घ. मम शत्रु । १५. ख. ग्रहयुग्मं । १६. घ. खाहियुग्मं ।

भक्षयुग्मं ततोच्चार्यं शोणितं पिब-युग्मकम् ।
वगलामुखि[1] उच्चार्य[2] वगलाबीजमुच्चरेत्[3] ।।७।।
'शक्ति वाराहमुच्चार्यं वर्मास्त्रं च समुद्धरेत्'[4] ।
'त्रिचत्वारिंशद्वर्णयुक्तं'[5] वगलायाः[6] सुपावनम् ।।८।।
दुर्वासा[7] ऋषिरेवात्र[8] छन्दोऽनुष्टुप् भवेच्छुभम्[9] ।
देवता वगलानाम्नी[10] जगद्व्यापकरूपिणी ।।९।।
ग्लौं[11] बीजं ह्लीं च शक्तिश्च फट्कारं कीलकं तथा ।
'मंत्रराजेन देव्याश्च'[12] न्यासविद्यां समाचरेत् ।।१०।।
ध्यानभेदं[13] प्रवक्ष्यामि मन्त्रभेदेन पुत्रक ।
चतुर्भुजां त्रिनयनां पीनोन्नतपयोधराम् ।।११।।
जिह्वां खङ्गं पानपात्रं गदां धारयन्तीं पराम्[14] ।
पीताम्बरधरां देवीं पीतपुष्पैरलङ्कृताम् ।।१२।।
बिम्बोष्ठीं चारुवदनां मदाघूर्णितलोचनाम् ।
सर्वविद्याकर्षिणीं च सर्वप्रज्ञापहारिणीम् ।।१३।।
भजेऽहं चास्त्रवगलां सर्वाकर्षणकर्मसु ।
एवं ध्यात्वा जपेन्मन्त्रं बाणलक्षं कुमारक ।।१४।।
तर्पयेत्तद्दशांशं च जपासंमिश्रवारिणा[15] ।
तद्दशांशं हुनेत् पुत्र तालकं चाज्यसंयुतम्[16] ।।१५।।
भगाकारे सुकुण्डेऽस्मिन्[17] मुद्रया हंस[18] बुद्धिमान् ।
वदरीफलमात्रं च आहुतीश्च कुमारक ।।१६।।
ब्राह्मणान् भोजयेत् पश्चात् सहस्रं शतमेव च ।
योगिनीं पूजयेत् पुत्र द्रव्यशुद्धिसमन्विताम् ।।१७।।
मन्त्रसिद्धिर्भवेत् सद्यो[19] देवता च प्रसीदति ।
शिवालये जपेन्मंत्रमयुतं च सुबुद्धिमान् ।।१८।।

---

१. घ. बगलामुखी । २. घ. समुच्चार्य । ३. घ. तद्बीजं च पुनर्वदेत् । ४. 'ततश्च शक्तिवाराहं वाराहं च समुच्चरेत्' । ५. घ. त्रयश्चत्वारिंशद्वर्णं । ६. घ. बगलास्त्रं । ७. घ. दूर्वासो । ८. घ. ०रेवास्य । ९. घ. एव च । १०. घ. ग्रास्त्रवगला ११. घ. ह्लौं । १२. मंत्रराजवदेवात्र । १३. घ. ध्यानं यत्नात् । १४. घ. शिवाम् । १५. घ. हेतुः संमिश्र० । १६. घ. चाल्पसंयुतम् । १७. घ. तु कुण्डे० । १८. ख. हंसीमुद्रेण । घ. हंसमुद्रेण । १९. घ. सत्यं ।

शत्रुक्षयं भवेत् सद्यो नान्यथा शिवभाषितम् ।
षट्सहस्रं जपेन्मन्त्रं निशायां चण्डिकालये ॥१९॥

जिह्वास्तम्भनमाप्नोति बृहस्पतिसमोऽपि वा ।
'जपित्वा च'[1] सहस्रं तु भैरवस्य च सन्निधौ ।२०॥

बुद्धिभ्रंशो भवेत् सद्यो वाणीपतिसमोऽपि वा ।
वीरभद्रालये पुत्र अयुतं जपमाचरेत् ॥२१॥

सिद्धिदो जायते वत्स नान्यथा शिवभाषणम् ।[2]
मातृकासन्निधौ मंत्री जपेद् दशसहस्रकम्[3] ॥२२॥

सद्यः स्तम्भनमाप्नोति वाल्मीकिसदृशोऽपि वा ।
ध्यानपूर्वं[4] जपेन्मन्त्री[5] अयुतं च कुमारक ॥२३॥

रूपयौवनवाञ्छत्रुर्व्याधिमान्[6] भवति ध्रुवम् ।
त्रिसहस्रं[7] जपेन्मन्त्रं[8] त्रिसहस्रं दिने दिने ॥२४।

मण्डलाच्छत्रुसम्मोहं[9] कुबेरसदृशोऽपि च ।
ऐश्वर्यं नाशमाप्नोति कुबेरसदृशोऽपि वा ॥२५॥

त्रिकालमयुतं जप्त्वा ध्यानपूर्वं सुबुद्धिमान् ।
बगलाध्यानतो मन्त्रमयुतं जपमाचरेत् ॥२६॥

सर्वाङ्गं[10] वायुना शत्रुः शीघ्रं गच्छेद् यमालयम्[11] ।
पार्वतीसन्निधौ मंत्री जपेदयुतमादिशन्[12] ॥२७॥

रात्रौ पूजासमायुक्तो नग्नो दक्षिणदिङ्मुखः ।
अन्धो भवति तच्छत्रुरवश्यं[13] क्रौञ्चभेदन ॥२८॥

विघ्नराजं समभ्यर्च्य रवौ[14] तु जपमाचरेत् ।
त्रिसहस्रं जपेन्मन्त्रं कुक्षिरोगी भवेद्रिपुः ॥२९॥

मण्डलान्नाशमायाति नात्र कार्या विचारणा ।
प्रयोगान्ते च संस्कारं पूजाकाले समाचरेत् ॥३०॥

इति श्रीषड्विद्यागमे सांख्यायनतंत्रे द्वाविंशतिः पटलः ॥

---

१. ख. जपित्वाष्ट । घ. जपेत्पंच । २. ध. निर्वीर्यो जायते शत्रुर्नान्यथा शिवभाषितम् । ३. घ. अष्टसहस्रकम् । ४. घ. ध्यानात् पूर्वं । ५. घ. जपेन्मंत्रं । ६. घ. ०व्याधितो । ७. ख. त्रिसंध्यं । घ. त्रिसंध्यं च । ८. ख. जपते मंत्रं । ९. क. ग. शत्रुसमूहं । १०. ख. घ. सर्वाङ्ग । ११. घ. यमालये । १२. घ. ०दयुतसंख्यया । १३. घ. तच्छत्रोर्मण्डला [त्] । १४. घ. रात्रौ ।

॥ अथ त्रयोविंशः पटलः ॥

स्वर्णसिंहासनासीनां सुन्दराङ्गीं शुचिस्मिताम् ।
बिम्बोष्ठीं चारुनयनां ध्यायेत् पीनपयोधराम् ॥१॥

स्कन्द[1] उवाच—

नमस्ताण्डवरुद्राय तापत्रयहराय च ।
वगलास्त्रमहामन्त्रैः प्रयोगान् वद शङ्कर ॥२॥

शिव[2] उवाच—

त्रिकालं तु समासीनो ध्यानपूर्वं तु[3] साधकः ।
त्रिसप्त मन्त्रयित्वा तु जपं पश्चात् समाचरेत् ॥३॥
नित्यं च त्रिसहस्रं तु षण्मासं विजितेन्द्रियः ।
वाचासिद्धिर्भवेत्तस्य शापानुग्रहकारका[4] ॥४॥
अश्वत्थमूले प्रजपेदयुतं ध्यानपूर्वकम् ।
भक्षणाद् व्याधिनाशं च भवेदेवं न संशयः ॥५॥
विभीतकतरोर्मूले अयुतं जपमाचरेत् ।
जिह्वास्तम्भनमाप्नोति साक्षाद्वागीश्वरोऽपिवा ॥६॥
कपित्थवृक्षमूले[6] तु प्रजपेदयुतं तथा ।
श्रोत्रस्तम्भनमाप्नोति सद्यो बधिरतां व्रजेत् ॥७॥
पिचुमंदतरोर्मूलेऽप्ययुतं जपमाचरेत् ।
प्राणस्तम्भनमाप्नोति[7] रोगी पीनसवान् भवेत् ॥८॥
कदलीमूलमाश्रित्य अयुतं जपमाचरेत् ।
पादस्तम्भो भवेत् सद्यो वातरोगी भवेद् रिपुः[8] ॥९॥
करञ्जमूलमाश्रित्याप्ययुतं जपमाचरेत् ।
स्तम्भयेज्जठराग्निस्तु अन्नद्वेषो भवेद् ध्रुवम् ॥१०॥
विषतिन्दुकमूलं च समाश्रित्य मनुं जपेत् ।
अयुताच्च[9] भवेत् पुत्र गात्रस्तम्भनमाप्नुयात् ॥११॥
नद्यां समुद्रगामिन्यां नाभिदघ्नजले[10] स्थितः[11] ।
तर्प्ययेद् वगलास्त्रेण ग्रस्तं कृत्वारिनाम[12] च ॥१२॥

---

१. घ. क्रौञ्चभेदन । २. घ. ईश्वर । ३. घ. सु । ४. घ. त्रिसहस्रे । ५. क. ख. ग. ०कारकम् । ६. घ. कपित्थतरु० । ७. घ. घ्राणस्तं० । ८. घ. नरः । ९. घ. नाभिमात्रे जले । १०. घ. नरः । ११. घ. तद्वैरिनाम ।

दिने दिने सहस्रैकं वगलाध्यानपूर्वकम् ।
गर्भस्रावं भवेत्तस्य भार्यायाः[1] शिवभाषितम् ॥१३॥[2]

बल्लीपलाशमूले तु जपेदयुतसंख्यया ।
मन्त्रमध्ये रिपोर्भार्यां ग्रस्तं कृत्वा कुमारक ॥१४॥

तर्पणं च दिवा कृत्वा रात्रौ रात्रौ[3] जपेन्मनुम् ।
सापि वन्ध्या भवेत् सत्यं नात्र कार्या विचारणा ॥१५॥

श्मशाने प्रजपेन्मन्त्रं ग्रस्तं कृत्वा तु पूर्ववत् ।
सद्यस्तद्भार्यानाशं च भवेदेवं न संशयः ॥१६॥

शून्यागारे जपेदेवमयुतं[4] ध्यानपूर्वकम् ।
लक्ष्मीर्नाशयते नूनं[5] स शत्रुरवशिष्यते ॥१७॥

जंबीरतरुमूले तु अयुतं जपमाचरेत् ।
'भ्रमाकुलकुलं सर्वं मण्डलान्नाशमाप्नुयात् ॥१८॥

शतवारं मन्त्रितं च शर्करोदकमेव च[6] ।
[7]रिपूणां चैव दातव्यं जिह्वास्तम्भनमाप्नुयात् ॥१९॥

[illegible]तं मन्त्रितं चैव नारिकेलफलोदकैः ।
पाययेद्रात्रि[8]रिपुभिर्जिह्वास्तंभनमाप्नुयात् ॥२०॥

नागवल्लीदलं चैव क्रमुकं चूर्णमेव च ।
सहस्रं मन्त्रितं पुत्र दातव्यं शत्रु(त्रू)णां निशि ॥२१॥

ताम्बूलचर्वणाच्छत्रुर्जिह्वास्तंभनमाप्नुयात् ।
चन्दनं चैव कस्तूरीघर्षितं मन्त्रयेत् सुत ॥२२॥

पुनश्च मन्त्रयेत्ताम्रपात्रे गुणसहस्रकम् ।
तच्चन्दनलेपनेन[9] रिपुर्भ्रान्तो[10] भविष्यति ॥२३॥

दन्तधावनकाष्ठं च मन्त्रयेत् त्रिसहस्रकम् ।
तत्काष्ठेन रिपोः[11] पुत्र दन्तधावनमात्रतः ॥२४॥

---

१. क. ग. घ. नार्यायाः । २. घ. पुस्तकेऽयं पाठो विशेषः—

ततो(तः) पलाशमूले तु प्रजपेच्च परे द्वयम् ।

३. घ. रात्रौ तु प्र । ४. घ. जपेन्मंत्र० । ५. घ. शीघ्रं । ६. ७. घ. पुस्तके नास्ति ।
८. घ. प्राशयेद्वारि । ९. घ. ०विलेपेन । १०. घ. परिभ्रान्तो । ११. घ. रिपुः ।

जिह्वां वाणीं च बुद्धिं च 'मनः पादादिकं'[१] तथा ।
स्तम्भनं च भवेच्छीघ्रं शिवस्य वचनं यथा ॥२५॥
प्रेतवस्त्रं रवौ ग्राह्यं चितिकाष्ठं च वेष्टयेत् ।[२]
श्मशाने निखनेद् रात्रौ त्रिसहस्रं जपेत्तदा[३] ॥२६॥
शेषभाषापतिः साक्षाद् बृहस्पतिरपि स्वयम् ।
जिह्वास्तम्भनमाप्नोति सद्यो मूकत्वमाप्नुयात् ॥२७॥

इति षड्विद्यागमे सांख्यायनतन्त्रे त्रयोविंशतिः[४] पटलः ॥२३॥

॥ अथ चतुर्विंशः पटलः ॥

अम्बां पीताम्बराढ्यामरुणकुसुमगन्धानुलेपां त्रिनेत्रां,
गम्भीरां कम्बुकण्ठीं कठिनकुचयुगां चारुबिम्बाधरोष्ठीम् ।
शत्रोर्जिह्वासिपत्रं[५] शरधनुसहितां व्यक्तगर्वाधिरूढां[६],
देवीं संस्तम्भरूपां सुविरलरसनामम्बिकां[७] तां भजामि[८] ॥१॥

स्कन्द[९] उवाच—

नमस्ते वृषभारूढ नमः पन्नगकङ्कण[१०] ।
लक्षण वद मे देव वगलामन्त्रमालिका[११] ॥२॥

ईश्वर उवाच

भृगुवारे च संगृह्य[१२] 'आरामस्थनिशां तथा'[१३] ।
'तां शुष्कां'[१४] सप्तरात्रं तु 'कृत्वा मेतामनन्तरम्'[१५] ॥३॥
भूताविपरितं[१६] चैव कपिलागोमयं तथा ।
पुनरेकान्तराद्ग्राह्यं[१७] भाण्डमध्ये तु निःक्षिपेत् ॥४॥
सविषं जलसंयुक्तं कुर्यान्मेलनमेव च ।
हरिद्रां तत्र निःक्षिप्य पूजयेदाशु तत्क्रमात् ॥५॥
चुल्लयोपरि च तद्भाण्डं रवौ रात्रौ च निःक्षिपेत् ।
द्विगुणं जलसंयुक्तं[१८] कुर्यान्मेलनमेव च ॥६॥

---

१. घ. क्षुत्पिपासामलं। २. घ. पुस्तकस्थोऽयं पाठो विशेशो दृश्यते—
प्राणप्रतिष्ठां कृत्वा तुं पूजां चैव तु कारयेत् ।
३. घ. जपेन्मनुम्। ४. घ. बगलास्त्रविवरणं नाम त्रयोविंशतिः। ५. घ. ०सिपत्रां। ६. घ. शुक्लगरवादिरूढां। ७. घ. सुविरलवसना०। ८. घ. नमामि। ९. घ. क्रौञ्चभेदन। १०. ०भूषण। ११. ०जपमालिकाम्। १२. घ. संग्राह्य। १३. घ. आरामस्वासिशां निशि १४. ख. छायाशुष्कां। घ. छायाभुक। १५. घ. कृत्वा तु तदनन्तरम्। १६. ख. भूमावपतितं। घ. भूमा(मौ) तु पतितं। १७. ख. पुनरेका कराद् ग्राह्यं। घ. पुनरेकांतशाद्ग्राह्यं। १८. घ. जपसंयुक्तं।

अश्वत्थैरिन्धनैरेव ज्वालां 'कृत्वा सुबुद्धिमान्'[१] ।
तस्यां[२] मृदु भवेत्तावत्पचनं सम्यगाचरेत् ॥७॥

गोमयस्थां[३] हरिद्रां च क्षालयेद्वारिणा[४] ततः ।
छायाशुष्कं च कर्त्तव्यं हरिद्रामणिमादरात् ॥८॥

तेन कुर्यान्मालिकां च अष्टोत्तरशतं तथा ।
पुण्यस्त्रीनिर्मितं[५] सूत्रं[६] 'मंत्रैः संच्छेदयेत्[७]' पुनः ॥९॥

तन्मालिकां रवौ 'वारेऽप्यमृतेनैव'[८] मार्जयेत् ।
अर्चयेन्मूलमन्त्रेण षोडशैरुपचारकैः ॥१०॥

निवेदयेत् पायसं च शर्कराज्यसमन्वितम् ।
सहस्रं प्रजपेदादौ[१०] पञ्चाशद्वर्णमादरात् ॥११॥

'एकाक्षरीमहामन्त्रैर्वगलानाम्नि'[११] पावनैः ।
अयुतं प्रजपेत् पुत्र मालिकासिद्धिमाप्नुयात् ॥१२॥

एवं च मालिकां कुर्यान् मंत्रसिद्धिमपेक्षता[१२] ।
हरिद्रावस्त्रमाच्छाद्य सिद्धचर्थं जपमाचरेत् ॥१३॥

हरिद्रामयपुष्पं[१३] च हरिद्रामयचन्दनम्[१४] ।
समर्पयेदलङ्कृत्य[१५] जपं रात्रौ समाचरेत् ॥१४॥

देवी भूत्वा जपेद्देवीमर्चयेद्विधिवद्यथा[१६] ।
प्रमादान् मालिका भूमौ पतिता चेत् कुमारक ॥१५॥

पुनः पूजा प्रकर्त्तव्या पूर्ववज्जपमाचरेत् ।
अथ वक्ष्ये प्रयोगांश्च मालिकालक्षणं तथा ॥१६॥

शृणु षण्मुख तद्योगं सर्वयोगोत्तमोत्तमम् ॥१०॥

'पीतावरणभूषी च पीतवस्त्रद्वयान्वितः'[10] ।
पीतयज्ञोपवीतस्तु महापीताश(स)ने[11] स्थितः[12] ॥११॥

'ज्वालामुख्यभिधं बाणं त्रिशतं प्रजपेत् सुत'[13] ।
'हरिद्राक्षमणि पीत'[14] सर्वकार्यं जपादिकम् ॥१२॥

वडवानलनामानं बाणमादौ जपेच्छतम् ।
उल्कामुख्यभिधं[15] बाणं द्विशतं प्रजपेत् सुत ॥१३॥

ज्वालामुख्यभिधं बाणं त्रिशतं प्रजपेत् नरः[16] ।
जातवेदमुखीबाणं 'वेदसंख्याशतं'[17] सुत ॥१४॥

बृहद्भानुमुखीबाणं जपेत् पञ्चशतं सुत ।
'य एकादि'[18] महाविद्यां कुल्लुकादिसमन्विताम्[19] ॥१५॥

नेत्रलक्षं जपेन्मन्त्रं क्रूरकर्मादिनाशने[20] ।
हरिद्रायां[21] चरेद्धो(द्धो)मं काम्यं गौरवमिच्छति ॥१६॥

---

१. ख. क्रूरग्रहविनाशाये । २. ख. विशनष्टि विनाशार्थे । ३. ख. षट्त्रिंशद्बाण० ।
४. ख. मणिस्तम्भे । ५. ख. रतिस्तम्भे । ६. ख. ०स्तम्भनेऽपि । ७. ख. शान्तौ ।
८. ख. कृत्याविष० । ८. ख. षन्मुखाबरः । रा. षण्मुखाचरेत् ।
९. '–' ख. पीताभरणभूषाढया पीतवस्त्रद्वयान्वितः ।
११. ख. महापीतासुनि । १२. ख. सुत । १३. '–' अयमंशो घ. रा. पुस्तकयो र्नास्ति ।
१४. ख. हरिद्राक्षेण मणिना । १५. घ. उल्कामुखाभिधं । १६. ख. सुत । रा. ततः ।
१७. ख. तदन्ते संस्मरेत् । १८. ख. एकाक्षरी । १९. घ. कुमार्केदि० । २०. ख. क्रूरकर्मण० । रा. कुकर्मादि० । २१. ख. हरिद्रया ।

शतं त्रिशतकं पुत्र हुनेद्दशसहस्रकम्[१] ।
'हरिद्राघृतसंमिश्रैः क्रूरकर्मविनाशनम्'[२] ॥१७॥
'हरिद्राहोममात्रेण क्रूरकर्मण(वि)नाशनम्'[३] ।
'तर्प्पणात्तालनीरेण हेतुना'[४] मार्जयेत् सुत ॥१८॥
'सुवासिनी ब्राह्मणांश्च'[५] 'वगलार्चां कुमारक'[६] ।
सौभाग्यार्चाक्रमेणैव' 'ब्राह्मीमुद्रां च'[७] धारणात् ॥१९॥
'बन्धनं त्रिपुरश्चैव दीपिका तस्य'[८] योजनात् ।
'कृत्यावश्यस्तम्भनाख्यो(ख्यं) 'योगं सर्वं भयापहम्'[९] ॥२०॥
त्रैलोक्यविजयं नाम विजयं[१०] मण्डलं तथा ।
पञ्चास्त्रमूलपठनाद् गारुडो जायते सुत ॥२१॥
पीताशी पीतत्राणी च पीतशय्यासमन्वितः ।
पीताम्बरादिसंयुक्तः पीतपूजापरायणः ॥२२॥[११]
पञ्चक्रमसमायुक्तां[१२] (क्तः) सिद्धयोगी[१३] नरः सुत ।
ग्रसिनीं सर्वविद्यानां रक्षणी सकलापदाम् ॥२३॥
मर्दिनी[१४] सर्वशत्रूणां नाशिनी सर्वरक्षसाम् ।
उपसंहारयोगेषु योगो यं भवति[१५] ध्रुवम् ॥२४॥
'अन्ययोगसमारम्भं कृतं सिद्धयति वा न वा'[१६] ।
'योगमेवं समासाध्य सिद्धभोगी'[१७] नरः कलौ ॥२५॥
'अघोराश्च पाशुपती संहारो मोहिनोपि(ति) च'[१८] ।
षट्त्रिंशदस्त्रसंस्तम्भः पञ्चास्त्रेण प्रजायते ॥२६॥
पञ्चास्त्रशस्त्रविज्ञानी पाञ्चभौतिकसिद्धियुक् ।
आद्यस्तु रणबाणास्त्रं[१९] रणादिस्तम्भने जपेत् ॥२७॥

---

१. रा. ०सहस्रवान् । ख. सहस्रं त्रिसहस्रकम् । २. ख. हुनेद्दशसहस्रं वा हरिद्रा० घृतमिश्रितैः ॥ ३. '–' अयमंशो नास्ति घ. रां. पुस्तकयो । ४. '–' ख. तर्पनाल्लनिरर्णय- चणहेतु । ५. ख. ब्राह्मणान् सुवासीनां । ६. '–' ख. भक्ता बालां वा च कुमारिकाम् । ७. ख. ब्राह्मीमुद्राभि । रा. ब्राह्मीमुद्रादि । ८. '–' ख. बन्धनानिष्ठुरश्चैव दीपकास्त्रस्य ।
९. '–' ख. रा. कृत्याविषस्तम्भनाख्यो योगः सर्वविषापहः ॥
१०. ख. कवचं । ११. श्लोकोऽयं ख. पुस्तके नास्ति । १२. ख. ० समासक्तः । १३. ख. सिद्धिभागी । रा. ०भोगी । १४. ख. मथिनी । १५. ख. रा चलति । १६. '–' ख. अन्ययोगः शरभवत् कृते सिद्धमानवः ।
१७. ख. रा. '–' योगमेनं समासाद्य सिद्धिभागी । १८. ख. रा. अघोरास्त्रे पाशुपते- संहारे मोहनेऽपिच । १९ ख. वडवाबाणो ।

उल्कामुखीद्वितीयास्त्रं 'स्तम्भनं भुवनत्रये'[१] ।
ज्वालामुखीतृतीयास्त्रं स्तम्भनं ऋषिदैवतैः ॥२८॥

जातवेदमुखीबाणो ब्रह्मविष्ण्वादिरक्षणे[२] ।
'सर्वकर्मस्तम्भने च'[३] चतुर्थं प्रजपेत् सुत ॥२९॥

बृहद्भानुमुखीबाणं[४] पञ्चमं[५] परिकीर्त्तितम्[६] ।
षट्पञ्चकोटिचामुण्डा कालीकोटिशतं सुत ॥३०॥

सपादकोटित्रिपुरा पञ्चाशत्कोटिभैरवाः ।
नारसिंहा यातुधानाः पूतनाः कोटिचेटकाः[७] ॥३१॥

समस्तस्तम्भनं पुत्र पञ्चमेन प्रजायते ।
हस्ते सम्पाद्य[८] 'पञ्चास्त्रं शासनास्त्रं[९]' स्मरेन्मुखे ॥३२॥
स कल्पमुखभागी[१०] स्यान्नात्र कार्या विचारणा ।
त्रैलोक्यविजयाख्यं च स्मरेदस्त्रेन्द्रमुत्तमम् ॥३३॥

यथोक्तकुण्डेषु हुनेद् वेदिकायां विशेषतः ।
चुल्ल्यां शकट्यां प्रेताग्नौ पञ्चस्थाने हुनेदपि ॥३४॥

चत्वरे सर्वकार्यार्थं होमयेदुक्तमार्गतः ।
'सकूर्चं स्रुक्स्रुवौ चैव तद्धश्वि(वि)श्च इति क्रमात्'[११] ॥३५॥

प्रणि(णी)ता प्रोक्षणीपात्रमाज्यस्थाली च षण्मुख[१२] ।
सकलं[१३] पूर्णपात्रं च 'ब्रह्मचर्येण योगतः'[१४] ॥३६॥

क्रमात् सर्वं तु सम्पाद्य होमं कुर्यात् प्रयत्नतः[१५] ।
'क्रूरकर्माणि नश्यन्ति'[१६] तालकेन हुनेत् सुत ॥३७॥

पीतपुष्पैश्च जुहुयात् क्रूरकर्मविनाशने[१७] ।
'क्रूरतर्पणयोगेन क्रूरविघ्ननिवारणम्'[१८] ॥३८॥

---

१. '—' ख. त्रिलेकीस्तम्भने जपेत् । २. ब्रह्मविद्या० । ३. ख. सर्वकर्मणसंस्तम्भे । रा. सर्वकर्माणि स्तम्भे च । ४. ख. ०बाणः । ५. ख. पञ्चमः । ६. ख. परिकीर्त्तितः । ७. ख. कटपूतनाः । रा. ०पूतनाः । ८. ख. संधार्यं । ९. '—' ख. चापास्त्रं ग्रसितास्त्रं । १०. ख. कल्पसुखभागी । रा. संकल्पमुखिभोगः । ११. '—' ख. —समित्कुशा स्रुकसुचौ च त्विष्मावर्हीति च क्रमात् । १२. ख. सन्मुखाः । १३. ख. कलशं । १४. ख. ब्रह्मचर्यो तु जापकः । रा. ब्रह्मचार्येण योगकः । १५. ख. प्रयोगवित् । १६. ख. रा. क्रूरकर्माणनिर्नाशे । १७. ख. कूटकृत्रिमनाशने । १८. '—' ख. —पीतेन तर्पयेदेव क्रूरग्रहनिवारणम् । रा. क्रूरे तर्पणाया देवी० ।

इति संक्षेपतः पूर्वं[1] किमन्यं[2] श्रोतुमिच्छसि ।
इति श्रीषड्विद्यागमे साँख्यायनतन्त्रे चतुस्त्रिंशत्पटलः[3] ॥३४॥

॥ अथ पञ्चत्रिंशः पटलः ॥

योषिदाकर्षणासक्तां[4] फुल्लचम्पकसन्निभाम्[5] ।
दुष्टस्तम्भनमासक्तां[6] वगलां स्तम्मिनीं भजे ॥१॥

क्रौञ्चभेदन उवाच—

नमस्ते सर्वसर्वेश कर्पूरद्युतिसन्निभ[7] ।
योगिन्[8] सर्वादिसर्वज्ञ बीजभेदं वद प्रभो ॥२॥

ईश्वर उवाच—

अथातः सम्प्रवक्ष्यामि वगलामन्त्रनिर्णयम् ।
षट्त्रिंशदक्षरी विद्या 'त्रिपुरे चैव तिष्ठति'[9] ॥३॥
सांख्यायनमते देव्या[10] नारायण[11] ऋषिः स्मृतः[12] ।
'गायत्रीछन्द उद्दिष्टं देवता वगलाह्वया'[13] ॥४॥
सांख्यायनमते देवि वामाचारविधिर्मतः ।
ब्रह्मयामलसम्मत्या ब्रह्मा चास्य ऋषिः स्मृतः ॥५॥[14]
'गायत्री छन्द आदिष्टं देवता सैव कीर्त्तिता'[15] ।
'जयद्रथाख्ययामले तु'[16] ऋषिर्नारद एव हि ॥६॥
छन्दादिकं पूर्ववत् स्यादिति संक्षेपतो मतम् ।
हारिद्रसंहितायां तु ऋषिर्नारायणो मतः ॥७॥
अनुष्टुप्छन्द आख्यातं[17] देवता वगलामुखी ।
सांख्यायनमतं देवी(वि)कलौ जागर्त्ति[18] केवलम् ॥८॥
मृत्युञ्जयजपं कृत्वा ततो विद्यां जपेत् सुत[19] ।
मृत्युञ्जयं विना देवो 'वगला नहि सिद्ध्यति'[20] ॥९॥

---

१. ख. प्रोक्त । २. ख. किमन्यच् । ३. ख. द्वात्रिंशति(एकत्रिंशत्)पटलः ॥३२। ४. घ. ०सक्त्यां । ५. ख. लसच्चम्पक० । ६. ख. ०स्तम्भनासक्तां । ७. रा. कर्पूरधवल ०। ८. ख. योगी । ९. '–' ख. त्रिधा च परितिष्ठिता। रा. ०चैव निष्ठिः । १०. ख. देवी । ११. ख. नारदोऽस्य । १२. ख. मतः । १३. '–' ख.—अनुष्टुप्छन्द आख्यातं देवता वगलाह्वया । रा. ०देवता सैव कीर्तिता । १४. पद्यमिदं घ. पुस्तके नास्ति । १५. घ. पुस्तके नास्ति पद्यार्द्धमिदम् । १६. ख. जयद्रथाख्ययामले । रा. जयद्रथयामले तु । १७. ख. त्रिष्टुप् छन्दः समाख्यातं । १८. ख. जाग्रति । १९. ख. सुधीः । २०. '–' घ. पुस्तके नास्ति ।

'ऋषिच्छन्दत्रितयकं मतभेदात् प्रदर्शितम् ।
बीजसंज्ञां प्रवक्ष्यामि'[१] सांख्यायनमुखोद्भवाम्[२] ॥१०॥

शिवबीजं[३] वह्नियुक्तं रतिबिन्दुसमन्वितम् ।
'वह्निशिवान्तराले तु'[४] भूबीजं योजयेत्(पेत्) सुत[५] ॥११॥

स्थिरमाया इति[६] प्रोक्ता विद्या त्वेकाक्षरी शुभा ।
अनया विद्यया देवि किन्न सिद्ध्यति भूतले ॥१२॥

पीतवासामते पुत्र[७] स्थिरमायां शृणु प्रिये ।
'स्थिरमायासमायुक्तं स्थिरं बीजमितीरितम्'[८] ॥१३॥

तदुद्धारं शृणु प्राज्ञ[९] गगनार्द्धं[१०] समुद्धरेत् ।
स्थिरबीजं समुद्धृत्य रतिबिन्दुसमन्वितम्[११] ॥१४॥

स्थिरमाया 'द्वितीयां तु इन्द्रस्तं चन्द्रभूषितम्'[१२] ।
'इयं शप्ता'[१३] महाविद्या कीलिता[१४] स्तम्भिता शिवे[१५] ॥१५॥

रेफयोगान्महेशानि[१६] निश्शप्ता[१७] फलदायिनी ।
रेफयुक्तां जपेद्विद्यां 'फलसिद्धिर्न संशयः'[१८] ॥१६॥

रेफहीनां जपेद्विद्यां कोटिजाप्यं[१९] न सिद्ध्यति ।
'तस्माद्रेफेण संयुक्त'[२०] स्थिरदा[२०] परमेश्वरि ॥१७॥

संजपेच् 'च ततः पुत्र'[२२] तस्य सिद्धिर्भविष्यति ।
लघुषोढां महाषोढां पञ्जरं न्यासमेव हि ॥१८॥

बगलामातृकान्यासं[२३] 'कुल्लुकां च विचिन्त्य वै'[२४] ।
सेत्वादिकामराजान्तं[२५] न्यासमृत्युञ्जयं[२६] जपेत् ॥१९॥

---

१. '–' चिन्हस्थोंऽशो घ. पुस्तके नास्ति । २. घ. रा. समुद्भवात् । ३. ख. जीव॰ बीजं । ४. ख. वह्नि॒नशैवा॰ । रा. वह्नि॒नः शि॰ । ५. ख. शिवे । ६. ख. त्वियं । ७. ख. देवि । ८. ख.—स्थिररूपा तु या माया स्थिरमाया तु सा मता ।
रा. स्थिररूपा तु मामाया स्थिरमाया समायतु ।

९. ख. प्राज्ञे । १०. ख. रा. गगनार्णं । ११. ख. ॰विभूषितम् । १२. ख. त्वियं देवि बिन्द्वर्द्धं चन्द्रभूषिता । १३. घ. रा. इमं समा । १४. घ. रा. कलिता । १५. घ. रा. सुत । १६. घ. रा. महा सैव । १७. घ. रा. नित्यभाक् । १८. ख. रेफहीनां न संजपेत् । १९. ख. ॰जाप्ये । २०. ख. तस्माद्रेफं तु संयोज्य । रा. तस्माद्रेफस्तु संयुक्तं । २१. ख. स्थिराधः । २२. ख, प्रयतो देवि । रा. स जपे शतदः पुत्र । २३. ख. ॰मातृकां न्यस्य । २४. घ. रा. सकृदाचरितं तदा । २५. घ. सत्वादि॰ । २६. घ. रा. न्यस्य ।

ततो वै प्रजपेद्विद्यां सदा जाग्रत्स्वरूपिणीम् ।
पीतवासामते देवि[2] पञ्चप्रेतगतां[1] स्मरेत् ॥२०॥

चतुर्भुजां वा द्विभुजां पीतार्णवनिवासिनीम् ।
सुधार्णवसमासीनां मणिमण्डपमध्यगाम् ॥२१॥

सांख्यायनमते देवि[4] संस्मरेद् यत्नतः शिवे[5] ।
सुन्दर्याः पश्चिमाम्नाये बगला परितिष्ठति[6] ॥२२॥

श्रीकाल्यामु(उ)त्तराम्नाये वगला पूज्यतां सुत ।

इति षड्विद्यागमे सांख्यायनतन्त्रे पञ्चत्रिंशत्पटलः[7] ॥३५॥

॥ अथ षट् त्रिंशः पटलः ॥

योगिनीकोटिसहितां पीताहारोपचञ्चलाम्[8] ।
वगलां परमां वन्दे[9] परब्रह्मस्वरूपिणीम् ॥१॥

क्रौंचभेदन उवाच–

चिदानन्दघनावास[10] 'वरमन्यं च मां वद'[11] ।
सर्व्वातीत परेशान 'सर्वभूतहिते रत'[12] ॥२॥

ईश्वर उवाच–

अथ 'स्कन्द प्रवक्ष्यामि'[13] 'सर्वकर्माणि नाशनम्'[14] ।
किं केन 'तामसं प्राप्तं'[15] किं केन शान्तिकारणम्[16] ॥३॥

कारणं तत्र केन स्यात् तत्सर्वं कथ्यते शृणु ।
आदौ मन्त्रं जपेत् पुत्र त्रिसहस्रमतन्द्रितः ॥४॥

ततः कवचमालम्ब्य[17] पुनर्म्मन्त्रं जपेत् तथा[18] ।
षट्त्रिंशद्वारमावर्त्य[19] पुरश्चरणमुच्यते ॥५॥

सर्वकर्माणि निर्नाशे[20] योगोऽयं परिकीर्त्तितः ।
अनुलोमविलोमेन द्वितीयो योग ईरितः ॥६॥

---

१. घ. रा. पुत्र । २. घ. मतां । ३. घ. रा. श्चरेत् । ४. घ. रा. पुत्र । ५. घ. रा. सुत । ६. ख. परिनिष्ठिता । रा. परितिष्ठताम् । ७. ख. त्रिंत्रिंश (द्वात्रिंश) पटलः । ८. घ. पीताहारोपि० । रा. पीतहारो० । ९. घ. रा. देवीं । १०. ख. ०घनस्वामिन् । ११. ख. सारमन्यन्महेश्वर । रा. सारमन्यं च मां वद । १२. ख. सर्वभूतहिताध्वर । १३. ख. षण्मुख मध्वामि । १४. ख. सर्वकर्माणनाशनम् । १५. ख. रा. नाम सम्प्राप्तं । १६. ख. ०कारकम् । १७. घ. रा. ०मारभ्य । १८. घ. रा. ततः । १९. घ. रा. षड्विंशद्वर्णमावृत्या । २०. ख. सर्वकर्मणनिर्नाशे ।

त्रिशतं च शतं चापि अष्टोत्तरसहस्रकम् ।
अष्टोत्तरशतं वापि कवचं पूर्ववद् भजेत्[१] ॥७॥
क्षुद्रकर्मणि[२] निर्नाशे योगोऽयं परिकीर्त्तितः ।
अनुलोमविलोमेन योगो वसुविधः स्मृतः ॥८॥
षट्त्रिंशद्वारमावर्त्य 'भवेदेवं विधिः सुत'[३] ।
कवचं प्रपठेदादौ मध्ये स्तोत्रं 'तु उच्चरेत्'[४] ॥९॥
शतावर्त्तनमात्रेण 'क्रूरकर्मणनाशनम्'[५] ।
अनुलोमविलोमेन द्वितीयो योग ईरितः ॥१०॥
गायत्रीं कवचं पुत्र मन्त्रं स्तोत्रं पुनश्च सा ।
षड्विंशद्वारमावर्त्य षट्त्रिंशावर्त्तनं चरेत् ॥११॥
अनेन क्रमयोगेन सर्वकर्मविनाशनम्[६] ।
तारायां कालिकायां च 'छिन्नायामेवमेव तु'[७] ॥१२॥
अनुक्रमेण[८] सर्वत्र कुर्यादावर्त्तनं बुधः ।
मन्त्रमात्रकार्यमेतत्[९] सर्वदोषनिवारणम्[१०] ॥१३॥
कवचं प्रथमं[११] बाणः कवचं च द्वितीयकम्[१२] ।
कवचं च तृतीयं[१३] स्यात् कवचं च चतुर्थकम्[१४] ॥१४॥
कवचं पञ्चमं[१५] बाणः कवचं प्रपठेत् कृती[१६] ।
अनुलोमविलोमेन द्वितीयो योग ईरितः ॥१५॥
रणस्तम्भे 'सर्वकर्मान्नाशने मृत्युस्तम्भने'[१७] ।
'प्राणरक्षादिव्यरक्षादेव्यो रक्षणकर्मणि'[१८] ॥१६॥
योगोऽयं कथितः पुत्र वगलामन्त्र ईरितः[१९] ।
शताक्षरीं जपेदादौ कवचं हृदयं तथा ॥१७॥

---

१. घ. रा. भवेत् । २. घ. रा. क्षुद्रकर्माणि । ३. ख. भवेदेकं पुनस्तथा । रा. भवेदेकं० ४. ख. पुनश्च तत् । ५. घ. रा. क्रूरकर्माणि० । ६. ख. सर्वकर्मणनाशनम् । ७. घ. रा. चिन्मयामेव एव च । ८. ख. मनुक्रमेण । ९. ख. मन्त्रयान्ते० । १०. ख. ०विनाशनम् । ११. ख. पञ्चमो । १२. ख. द्वितीयकः । १३. ख. तृतीयः । १४. ख. चतुर्थकः । १५. ख. रा. पञ्चमो । १६. घ. रा. ततः । १७. ख. मनःस्तम्भे सर्वकर्मणनाशने । १८. '–'ख.—
मृत्युस्तम्भे प्राणरक्षादिव्यरक्षणकर्मणि ।
१९. ख. काल्यादौ मन्त्रयोगतः । रा. कल्पादौ० ।

कवचं वेदवर्णं च कवचं चन्द्रवर्णकम्[1] ।
अनेन क्रमयोगेन 'योगः कर्मणनाशनः'[2] ॥१८॥

'एकाक्षरीं जपेदादौ'[3] कवचं प्रपठेद् यतः[4] ।
वेदाक्षरीं जपेदादौ कवचं प्रपठेत्तथा ॥१९॥

वेदाक्षरी[5] ततो जाप्यः कवचं तदनन्तरम् ।
षट्त्रिंशदक्षरी जाप्यः कवचं तदनन्तरम् ॥२०॥

वेदाक्षरीमनुपुरं[6] कवचं प्रथमं तथा ।
'कवचं च द्वितीयः स्यात् कवचं च तृतीयकः'[7] ॥२१॥

'कवचं च चतुर्थः स्यात् कवचं पञ्चमस्तथा'[8] ।
कवचं हृदयं[9] वाचं कवचं शतवर्णकम् ॥२२॥

'कवचात् कीलनं योगः त्रैलोक्यरक्षणाकरः'[10] ।
अनेन क्रमयोगेन त्रैलोक्यस्तम्भनं भवेत्[11] ॥२३॥

इन्द्रादिपदसंस्तम्भे समुद्रस्तम्भनेऽपि[12] च ।
'महाविद्यास्तम्भनं च सत्यं ब्रह्मास्त्रस्तम्भनम्'[13] ॥२४॥

'महापाशुपतादीनां स्तम्भने'[14] मृत्युपातने ।
महाब्रह्मास्त्रयोगो हि[15] गोपनीयं प्रयत्नतः ॥२५॥

इति षड्विद्यागमे सांख्यायनतन्त्रे 'ईश्वरषण्मुखसंवादे महादिव्यप्रयोगकथनं नाम'[16] षट्त्रिंशत्पटलः[17] ।

॥ अथ पञ्चत्रिंशः पटलः ॥

पीतवर्णसमासीनां पीतगन्धानुलेपनाम् ।
पीतोपहाररसिकां भजे पीताम्बरां पराम् ॥१॥

क्रौञ्चभेदन उवाच–

स्वामिन् सिद्धगु(ग)णाध्यक्ष समस्तगणपारग ।
रहस्यं सूचितं पूर्वं किन्न मह्यं प्रदर्शितम् ॥२॥

---

१. ख. षड्वर्णकः । २. घ. रा. योगकर्माणि नाशनः । ३. घ. जपेदादौ कवचं ४. ख. तथा । ५. घ. वेदाक्षरी । ६. ख. पञ्चचत्वारिंशन्मनु । रा. चत्वारिंशन्मनुपुरं ७. ८. '–' चिह्नस्थांशद्वयी घ. पुस्तके नास्ति । ९. ख. हृदया । १०. ख.—

कवचात्कीलयन मनु प्राणत्रैलोक्यरक्षणः ।

११. ख. क्षणात् १२. घ. ०स्तम्भनेति । १३. अयमंशो नास्ति ख. पुस्तके । १४. ख. महापाशुपतास्त्रादिपातने । १५. घ. रा. पि । १६. घ. रा. नास्त्ययमंशः । १७. ख. चतुस्त्रिंशत् (त्रित्रिंशत्) पटलः :

ईश्वर उवाच–

तत्त्वं वद महादेव यदि पुत्रोऽस्मि ते वद।
रहस्यातिरहस्यं च कथ्यते शृणु पुत्रक ॥३॥
अमात्यानां च दुष्टानां दूषकानां दुरात्मनाम्।
क्षुद्रग्रहादिजातीनां सैन्यानामपि पुत्रक ॥४॥
क्रूरग्रहविनाशाय सर्वशान्त्यर्थमेव च।
पराभिचारशान्त्यर्थं रक्षार्थे च विशेषतः ॥५॥
अपमृत्युविनाशार्थं रोगशान्त्यर्थमेव च।
परसेनाविनाशाय स्वसेनारक्षणाय च ॥६॥
आत्मार्थं च परार्थं च विजयार्थं च षण्मुख।
वेतालाश्च विनाशार्थे भैरवादिप्रशान्तये ॥७॥
ससस्तविषनिर्नाशे मुष्टिकुक्षिविधावपि।
शस्त्रास्त्रबाणसंधाने संहारास्त्रादिनाशने ॥८॥
शस्त्रास्त्रस्तम्भने पुत्र तद्वच्छवि(व)विधावपि।
स्तब्धीकरणनिर्नाशे(र्णाशे) मृतकोत्थापनेऽपि च ॥९॥
देशोपद्रवनाशार्थे राष्ट्रभङ्गे समागते।
कोटिकृत्याविनाशार्थे स्वेष्टरक्षणकर्मणि ॥१०॥
हृतनष्टप्रणष्टादिवारुणाग्नेयजातिषु।
पत्रपुष्पफलं शाखाजटात्वक्क्षीरनीरके ॥११॥
महाविषे तैजसे तु विण्मूत्रविजरकृते।
उद्भ्रान्तधूलिनाशार्थे घटकृत्याविनाशने ॥१२॥
जलकृत्याविनाशार्थे स्थलकृत्याविनाशने।
वृक्षकृत्यानाशनार्थे गन्धकृत्याविधावपी(पि) ॥१३॥
महेन्द्रपदनिर्नाशे विरूंडानाशनेऽपि च
भेरुंडनाशनार्थे च रिक्तधावेशभैरवे ॥१४॥
सस्यस्तंभे दारुनाशे मन्त्रमण्डलरोगहृत्।
सप्तब्रह्मास्त्रयोगोऽयं सर्वथा चलति ध्रुवम् ॥१५॥
अमोघमृत्युनाशाय समाश्चर्यकमाय(प)दि।
तं प्रयोगमहायोगं शृणु सावहितो भव ॥१६॥

कुण्डे वा स्थण्डिले वेद्यां चत्वरे पितृकानने ।
चुल्यां सकटया(शकट्यां)वा देवि होतव्यं सर्वकर्मणि ॥१७॥
शुभर्क्षादियोगे तु प्रयोगमादरे[त्]सुत ।
स्वस्तिवाचनमासाद्य द्विजानां वरणं चरेत् ॥१८॥
वगलास्त्रं मध्यभागे करे निष्ठुरबंधनम् ।
पञ्चास्त्रं दक्ष(क्षि)णांशे च मूलास्त्रं होमकर्मणि ॥१९॥
त्रैलोक्यविजयास्त्रं च स्मरेदस्त्रेन्द्रमुत्तमम् ।
निष्ठुरांश्चालयेदेव दीपकास्त्रं प्रयोजयेत्॥२०॥
पूर्वभागे तु पञ्चास्त्रमुत्तरे मुण्डमुत्तमम् ।
महोग्रविजयं दक्षे विजयास्त्रं प्रयोजितम् ॥२१॥
हेलार्क्का चंदला तूर्या तथा पञ्चाङ्गुली प्रिया ।
पश्चिमे कीर्त्तिता विद्या बंधद्वयपुरस्सरम् ॥२२॥
आदौ गणपतिं पूज्य द्वारपूजादिसंयुतम् ।
विप्राणां वरणं कृत्वा वगलादीपमाचरेत् ॥२३॥
मण्डले वगलादीपो(पः)कवचे मूलदीपकः ।
पीताशा(शी) पीतवस्त्राढ्या(ढ्यः) पीतयज्ञोपवीतवान् ॥२४॥
पीताशनी पीतभक्षी पीतशय्यापरायणः ।
हरिद्राक्षेण मणिना सर्वं कार्यं जपादिकम् ॥२५॥
हरिद्राभिः सुरक्ताभिः रोचनाघृतमिश्रितैः ।
बिल्वप्रसूनैर्जुहुयात् सर्वोत्पातनिवारणम् ॥२६॥
अथवा पीतपुष्पैस्तु हरिद्रामधुयोजनम् ।
हरिद्रया दरिद्राणि नश्यन्त्येव न संशयः ॥२७॥
अनेन योगच(व)र्येण सर्वोत्पातनिवारणम् ।
पीताभरणभूषाढ्य (ढ्यः) पीतशालानिवासकृत् ॥२८॥
शतमष्टोत्तरशतं त्रिशतं च सहस्रकम् ।
त्रिसहस्रं पञ्च तथा दिग्विंशत्यादिरेव च ॥२९॥
पञ्चविंशच्च पञ्चाशत् सहस्रं लक्षमानकम् ।
लक्षोपरि महेशानि न होमोऽस्ति महीतले ॥३०॥
सुन्दर्यां कालिकायां च वैदिके कोटिमात्रकम् ।
होमस्य तु दशांशेन तर्पणं मार्ज्जनं तथा ॥३१॥

सुरया तर्प्पणं पुत्र तेन मार्ज्जनमाचरेत् ।
अभिषेको विप्रभोज्यं साङ्गयोगं प्रसिद्ध्यति ॥३२॥

नातः परतरो योगो विद्यते भुवि मण्डले ।
सर्वकर्म्मविनाशार्थं विषनाशार्थमद्भुतम् ॥३३॥

गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ।
रहस्यातिरहस्यं च रहस्यातिरहस्यकम् ॥३४॥

इति संक्षेपतः प्रोक्तं तोषयेद्दक्षिणादिना ।
प्रयोगस्योपसंहार (रः) कर्त्तव्यः सिद्धिमिच्छता ॥३५॥

इति षड्विद्यागमे सांख्यायनतन्त्रे
पञ्चत्रिंशत् (चतुस्त्रिंशत्) पटलः ॥३५॥

परिशिष्टम्-(क)

ऋष्यादिन्यासध्यानादियुताः

।। सांख्यायनतन्त्रगता मन्त्राः ।।

१. एकाक्षरीबगलामन्त्रः—ह्लीं ।

ॐ अस्य श्रीबगलामुख्येकाक्षरीमहामन्त्रस्य ब्रह्मा ऋषिर्गायत्रीछन्दः श्रीबगलामुखी देवता लँ बीजं, ह्लीं शक्तिः, ईं[1] कीलकं श्रीबगलामुखीदेवताम्बा-प्रसादसिद्ध्यर्थे जपे विनियोगः ।

ऋष्यादिन्यासः—ब्रह्मर्षये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, श्रीबगलामुखीदेवतायै नमो हृदि, लँ बीजाय नमो गुह्ये, ह्लीं शक्तये नमः पादयोः, रँ कीलकाय नमः सर्वाङ्गे ।

करन्यासः—ॐ ह्लाँ अङ्गुष्ठाभ्यां नमः, ॐ ह्लीं तर्जनीभ्यां स्वाहा, ॐ ह्लूँ मध्यमाभ्यां वषट्, ॐ ह्लैं अनामिकाभ्यां हुम्, ॐ ह्लौं कनिष्ठिकाभ्यां वौषट्, ॐ ह्लः करतलकरपृष्ठाभ्यां फट् ।

हृदयादिन्यासः—ॐ ह्लाँ हृदयाय नमः, ॐ ह्लीं शिरसे स्वाहा, ॐ ह्लूँ शिखायै वषट्, ॐ ह्लैं कवचाय हुम्, ॐ ह्लौं नेत्रत्रयाय वौषट्, ॐ ह्लः अस्त्राय फट् ।

ध्यानम्—वादी मूकति रङ्कति क्षितिपतिर्वैश्वानरः शीतति,
क्रोधी शान्तति दुर्जनः सुजनति क्षिप्रानुगः खञ्जति ।
गर्वी खर्वति सर्वविच्च जडति त्वद्यन्त्रिणा यन्त्रितः,
श्रीनित्ये बगलामुखि प्रतिदिनं कल्याणि तुभ्यं नमः ।।

[पञ्चमः पटलः— पृष्ठ—१२, १३]

२. श्रीबगलाषट्त्रिंशदक्षरीविद्यामन्त्रः—ॐ ह्लीं बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तम्भय जिह्वां कीलय बुद्धिं विनाशय ह्लीं ॐ स्वाहा ।

ॐ अस्य श्रीबगलामुखीषट्त्रिंशदक्षरीविद्यामहामन्त्रस्य श्रीनारदऋषिः, बृहतीछन्दः,[2] श्रीबगलामुखीदेवता, लँ बीजं, हँ शक्तिः, ईं[3] कीलकं, श्रीबगला-मुखीदेवताप्रसादसिद्ध्यर्थे जपे विनियोगः ।

---

१. 'रं' इत्यन्यत्र । २. 'अनुष्टुप्छन्दः' इत्यन्यत्र दृश्यते । ३. 'रँ' इत्यन्यत्र ।

ऋष्यादिन्यासः—श्रीनारदर्षये नमः शिरसि, बृहतीछन्दसे नमो मुखे, श्रीबगलामुखीदेवतायै नमो हृदये, लँ बीजाय नमो गुह्ये, हँ शक्तये नमः पादयोः, ईं कीलकाय नमः सर्वाङ्गे ।

करन्यासः—ॐ ह्लीं अङ्गुष्ठाभ्यां नमः, ॐ ह्लीं बगलामुखि तर्जनीभ्यां स्वाहा, ॐ ह्लीं सर्वदुष्टानां मध्यमाभ्यां वषट्, ॐ ह्लीं वाचं मुखं पदं स्तम्भय अनामिकाभ्यां हुँ, ॐ ह्लीं जिह्वां कीलय कनिष्ठिकाभ्यां वौषट्, ॐ ह्लीं बुद्धिं विनाशय ह्लीं ॐ स्वाहा करतलकरपृष्ठाभ्यां फट् ।

हृदयादिन्यासः—ॐ ह्लीं हृदयाय नमः, ॐ ह्लीं बगलामुखि शिरसे स्वाहा, ॐ ह्लीं सर्वदुष्टानां शिखायै वषट्, ॐ ह्लीं वाचं मुखं पदं स्तम्भय कवचाय हुँ, ॐ ह्लीं जिह्वां कीलय नेत्रत्रयाय वौषट्, ॐ ह्लीं बुद्धिं विनाशय ह्लीं ॐ स्वाहा अस्त्राय फट् ।

ध्यानम्—चतुर्भुजां त्रिनयनां कमलासनसंस्थिताम् ।
त्रिशूलं पानपात्रं च गदां जिह्वां च बिभ्रतीम् ॥
बिम्बोष्ठीं कम्बुकण्ठीं च समपीनपयोधराम् ।
पीताम्बरां मदाघूर्णां ध्यायेद् ब्रह्मास्त्रदेवताम् ॥

[सप्तमः पटलः—पृष्ठ-१६-१७]

३. श्रीबगलामुखीगायत्रीमन्त्रः—ॐ ह्लीं ब्रह्मास्त्राय विद्महे स्तम्भनबाणाय धीमहि तन्नो बगला प्रचोदयात् ।

ॐ अस्य श्रीबगलागायत्रीमन्त्रस्य ब्रह्मा ऋषिः, गायत्रीछन्दः, ब्रह्मास्त्रबगलादेवता, ॐ बीज, ह्लीं[1] शक्तिः, विद्महे कीलकं, श्रीबगलामुखीदेवताप्रसादसिद्धये जपे विनियोगः ।

ऋष्यादिन्यासः—श्रीब्रह्मर्षये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, श्रीब्रह्मास्त्रबगलामुखीदेवतायै नमो हृदये, ॐ बीजाय नमो गुह्ये, ह्लीं शक्तये नमः पादयोः, विद्महे कीलकाय नमः सर्वाङ्गे ।

करन्यासः—ॐ ह्लीं ब्रह्मास्त्राय विद्महे अङ्गुष्ठाभ्यां नमः, स्तम्भनबाणाय धीमहि तर्जनीभ्यां स्वाहा, तन्नो बगला प्रचोदयात् मध्यमाभ्यां वषट्, ॐ ह्लीं ब्रह्मास्त्राय विद्महे अनामिकाभ्यां हुम्, स्तम्भनबाणाय धीमहि कनिष्ठिकाभ्यां वौषट्, तन्नो बगला प्रचोदयात् करतलकरपृष्ठाभ्यां फट् ।

---

१. 'ह्रीं' इत्यपि पाठः ।

हृदयादिन्यासः—ॐ ह्लीं ब्रह्मास्त्राय विद्महे हृदयाय नमः, स्तम्भनबाणाय धीमहि शिरसे स्वाहा, तन्नो बगला प्रचोदयात् शिखायै वषट्, ॐ ह्लीं ब्रह्मास्त्राय विद्महे कवचाय हुम्, स्तम्भनबाणाय धीमहि नेत्रत्रयाय वौषट्, तन्नो बगला प्रचोदयात् अस्त्राय फट् ।

ध्यानं पूर्ववत् ।

[द्वादशः पटलः—पृष्ठ-२९]

४. **पञ्चपञ्चाशदक्षरो बगलामुखीपञ्चास्त्रमन्त्रः**—ॐ ह्लीं हूं ग्लौं बगलामुखि ह्लां ह्लीं ह्लूं सर्वदुष्टानां ह्लैं ह्लौं ह्लः वाचं मुखं पदं स्तम्भय स्तम्भय ह्लः ह्लौं ह्लैं जिह्वां कीलय ह्लूं ह्लीं ह्लां बुद्धिं विनाशय ग्लौं हूं ह्लीं ॐ स्वाहा ।[१]

ॐ अस्य श्रीबगलामुखीपञ्चास्त्रमहामन्त्रस्य वसिष्ठऋषिः, पङ्क्तिश्छन्दः, रणस्तम्भनकारिणी बगलामुखी देवता, लँ बीजं, ह्लीं शक्तिः, रं कीलकं श्रीबगलामुखीदेवताम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ऋष्यादिन्यासः—श्रीनारदऋषये नमः शिरसि, श्रीबगलामुखीदेवतायै नमो हृदये, लँ बीजाय नमो गुह्ये, हँ शक्तये नमः पादयोः इँ कीलकाय नमः सर्वाङ्गे ।

करन्यासः—ॐ ह्लीं अङ्गुष्ठाभ्यां नमः, ॐ ह्लीं बगलामुखि तर्जनीभ्यां स्वाहा, ॐ ह्लीं सर्वदुष्टानां मध्यमाभ्यां वषट्, ॐ ह्लीं वाचं मुखं पदं स्तम्भय अनामिकाभ्यां हुम्, ॐ ह्लीं जिह्वां कीलय कनिष्ठिकाभ्यां वौषट्, ॐ ह्लीं बुद्धिं विनाशय ह्लीं ॐ स्वाहा करतलकरपृष्ठाभ्यां फट् । एवं हृदयादिन्यासः ।

ध्यानम्—पीताम्बरधरां देवीं द्विसहस्रभुजान्विताम् ।
सान्द्रजिह्वां गदां चास्त्रं धारयन्तीं शिवां भजेत् ॥

[पञ्चदशः पटलः—पृष्ठ ३८-३९]

५. **अष्टपञ्चाशदक्षर उल्कामुख्यस्त्रमन्त्रः**—ॐ ह्लीं ग्लौं बगलामुखि ॐ ह्लीं ग्लौं सर्वदुष्टानां ॐ ह्लीं ग्लौं वाचं मुखं पदं ॐ ह्लीं ग्लौं स्तम्भय स्तम्भय ॐ ह्लीं ग्लौं जिह्वां कीलय ॐ ह्लीं ग्लौं बुद्धिं विनाशय ॐ ह्लीं ग्लौं ह्लीं ॐ स्वाहा ।[२]

---

१. "ॐ ह्लीं हूँ ग्लौं बगलामुखि ह्लां ह्लीं ह्लूं सर्वदुष्टानां ह्लैं ह्लौं ह्लः वाचं मुखं पदं स्तम्भय ह्लः ह्लौं ह्लैं जिह्वां कीलय ह्लां ह्लौं ह्लां बुद्धिं विनाशय ह्लां ह्लीं ह्लूं ग्लौं हूँ ह्लीं ॐ स्वाहा" इत्येवंविधो मन्त्रोऽप्यन्यत्र दृश्यते ।

२. "ॐ ह्लीं ग्लौं बगलामुखि सर्वदुष्टानां ॐ ह्लीं ग्लौं वाचं मुखं पदं ॐ ह्लीं ग्लौं स्तम्भय स्तम्भय ॐ ह्लीं ग्लौं जिह्वां कीलय कीलय ॐ ह्लीं ग्लौं बुद्धिं नाशय नाशय ॐ ह्लीं ग्लौं स्वाहा" इत्यपि मन्त्रभेदो दृश्यतेऽन्यत्र ।

ॐ अस्य श्रीउल्कामुख्यस्त्रमन्त्रस्य श्रीअग्निवराह[1] ऋषिः, ककुप्[2] छन्दः, श्रीउल्कामुखी देवता, ह्लीं बीजं, स्वाहा शक्तिः, ग्लौं कीलकं, जगत्स्तम्भनकारिणी श्रीउल्कामुखीदेवताम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ऋष्यादिन्यासः—श्रीवराहर्षये नमः शिरसि, अनुष्टुप्छन्दसे नमो मुखे, श्रीउल्कामुखीदेवतायै नमो हृदि, ह्लीं बीजाय नमो गुह्ये, स्वाहाशक्तये नमः पादयोः, ग्लौं कीलकाय नमः सर्वाङ्गे ।

मूलमन्त्रवत्करषडङ्गन्यासाः ।

ध्यानम्—विलयानलसंकाशां वीरां वेदसमन्विताम् ।
त्रिराणमयीं महादेवीं स्तम्भनार्थं भजाम्यहम् ।।

[पञ्चदशः पटलः—पृष्ठ-३६]

६. **षष्टिवर्णात्मकः श्रीजातवेदमुख्यस्त्रमन्त्रः**—ॐ ह्लीं ह्सौं ह्लीं ॐ बगलामुखि सर्वदुष्टानां ॐ ह्लीं ह्सौं ह्लीं ॐ वाचं मुखं पदं स्तम्भय स्तम्भय ॐ ह्लीं ह्सौं ह्लीं ॐ जिह्वां कीलय ॐ ह्लीं ह्सौं ह्लीं ॐ बुद्धिं नाशय नाशय ॐ ह्लीं ह्सौं ॐ स्वाहा ।[3]

ॐ अस्य श्रीजातवेदमुख्यस्त्रमन्त्रस्य श्रीकालाग्निरुद्र ऋषिः, पंक्तिश्छन्दः, श्रीजातवेदमुखी देवता, ॐ बीजं, ह्लीं[4] शक्तिः, हँ कीलकम्, मम श्रीजातवेदमुखीदेवताम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ऋष्यादिन्यासः—श्रीकालाग्निरुद्रर्षये नमः शिरसि, पंक्तिच्छन्दसे नमो मुखे, श्रीजातवेदमुखीदेवतायै नमो हृदये, ॐ बीजाय नमो गुह्ये, ह्रीँ शक्तये नमः पादयोः, हँ कीलकाय नमः सर्वाङ्गे ।

मूलमन्त्रवत्करषडङ्गन्यासाः—

ध्यानम्—जातवेदमुखीं देवीं देवतां प्राणरूपिणीम् ।
भजेऽहं स्तम्भनार्थं च स्तंभिनीं[5] विश्वरूपिणीम् ।।

[षोडशः पटलः-पृष्ठ-४०-४१]

१. 'यज्ञवाराह' इत्यपि पाठः । २. 'अनुष्टुप्' इत्यन्यत्र ।

३. मन्त्रोऽयं सूत्रानुसारेण तु द्वाषष्टिवर्णात्मको जायते किन्त्वन्यत्र निम्नोद्धृतरीत्या दृश्यते षष्टिवर्णः—

"ॐ ह्लीं ह्रौं ह्लीं बगलामुखि सर्वदुष्टानां ॐ ह्लीं ह्रौं ह्लीं ॐ वाचं मुखं पदं स्तम्भय स्तम्भय ॐ ह्लीं ह्रौं ह्लीं ॐ जिह्वां कीलय ॐ ह्लीं ह्रौं ॐ बुद्धिं नाशय नाशय ॐ ह्लीं ह्रौं ह्लीं ॐ स्वाहा ।।

४. 'ह्रीं' इत्यपि पाठः । ५. चिन्मयीमिति पाठः क्वचित् ।

७. **विंशोत्तरशतवर्णात्मको ज्वालामुख्यस्त्रमन्त्रः**—ॐ ह्लीं राँ रीं रूँ रैं रौं प्रस्फुर प्रस्फुर बगलामुखि[1] ॐ ह्लीं राँ रीं रूँ रैं रौं प्रस्फुर प्रस्फुर सर्वदुष्टानां ॐ ह्लीं राँ रीं रूँ रैं रौं प्रस्फुर प्रस्फुर वाच मुखं पदं स्तम्भय स्तम्भय ॐ ह्लीं राँ रीं रूँ रैं रौं प्रस्फुर प्रस्फुर जिह्वां कीलय कीलय ॐ ह्लीं रां रीं रूँ रैं रौं प्रस्फुर प्रस्फुर बुद्धिं विनाशय विनाशय ॐ ह्लीं रां री रूँ रैं रौं प्रम्फुर प्रस्फुर स्वाहा ।[2]

ॐ अस्य श्रीज्वालामुख्यस्त्रमन्त्रस्य श्रीअत्रि ऋषिर्गायत्री छन्दः, श्रीज्वालामुखी देवता, ॐ बीजं, ह्लीं शक्तिः, हूँ कीलकं श्रीज्वालामुखीदेवताम्बाप्रसादसिद्धचर्थे जपे विनियोगः ।

ऋष्यादिन्यासः—श्री अत्रिऋषये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, श्रीज्वालामुखीदेवतायै नमो हृदि, ॐ बीजाय नमो गुह्ये, ह्लीं शक्तये नमः पादयोः, हूँ कीलकाय नमः सर्वाङ्गे ।

मूलमन्त्रवत्करषडङ्गन्यासाः

ध्यानम्—ज्वलत्पद्मासनायुक्तां कालानलसमप्रभाम् ।
चिन्मयीं स्तम्भिनीं देवीं भजेऽहं विधिपूर्वकम् ।।

[षोडशः पटलः—पृष्ठ–४१]

८. **षडुत्तरशताधिकवर्णात्मकः श्रीबृहद्भानुमुख्यस्त्रमन्त्रः**—ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः ॐ बगलामुखि ॐ ह्लां ह्लीं ह्लूं ह्लैं ह्लौं ह्लः ह्लाँ ह्लीं ह्लूं ह्लैं ह्लौं ह्लः ॐ सर्वदुष्टानां वाचं मुखं पदं स्तम्भय स्तम्भय ॐ ह्लाँ ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ह्लाँ ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ॐ जिह्वां कीलय ॐ ह्लाँ ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ह्लाँ ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ॐ बुद्धिं नाशय ॐ ह्लाँ ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ह्लाँ ह्लीं ह्लूँ ह्लैं ह्लौं ह्लः ॐ ह्लीं ॐ स्वाहा ।[3]

१. एतत्पदस्थाने 'ज्वालामुखि' पदं सूत्रे वर्तते किन्तस्य ग्रहणान्मंत्रे एकाक्षरन्यूनता स्यादतस्तत्पदमेवात्र संगृहीतम् ।

२. सूत्रे तु 'वह्निबीजं च पञ्चकं' इति दर्शनात्त्वत्र 'रँ रँ रँ रँ रँ' इति बीजानि ग्राह्याणि किन्तूपर्युक्तबीजानामन्यत्रापि व्यवहारादत्रापि स्वीकृता नीत्यूह्यानि

३. अन्यत्रैष मन्त्रश्चतुरुत्तरशतवर्णात्मकोऽपि दृश्यते यथा–ॐ ह्लाँ ह्लीं ह्लूं ह्लैं ह्लौं ह्लः ह्लः ह्लाँ ह्लीं ह्लूं ह्लीं ह्लौं ह्लूं बगलामुखि ॐ ह्लाँ ह्लीं ह्लूं ह्लैं ह्लौं ह्लः ह्लः ह्लाँ ह्लीं ह्लूं ह्लैं ह्लौं ह्लूं सर्वदुष्टानां वाचं मुखं पदं स्तम्भय स्तम्भय ॐ ह्लाँ ह्लीं ह्लूं ह्लैं ह्लौं ह्लः ह्लः ह्लाँ ह्लैं ह्लूं ह्लौं ह्लौं ह्लूं जिह्वां कीलय ॐ ह्लाँ ह्लीं ह्लूं ह्लैं ह्लौं ह्लः ह्लः ह्लाँ ह्लीं ह्लूं ह्लैं ह्लौं ह्लूं बुद्धिं नाशय ॐ ह्लाँ ह्लीं ह्लूं ह्लैं ह्लौं ह्लः ह्लः ह्लाँ ह्लीं ह्लूं ह्लैं ह्लौं ह्लूं स्वाहा ।।

ॐ अस्य श्रीबृहद्भानुमुख्यस्त्रमन्त्रस्य श्रीसविता ऋषिः, गायत्री छन्दः, श्रीबृहद्भानुमुखी देवता, ह्लीं बीजं, ह्रीं शक्तिः, ॐ कीलकं, श्रीबृहद्भानुमुखी-देवताम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ऋष्यादिन्यासः—श्री सवितृषये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, श्रीबृहद्भानुमुखीदेवतायै नमो हृदये, ह्लीं बीजाय नमो गुह्ये, ह्रीं शक्तये नमः पादयोः, ॐ कीलकाय नमः सर्वाङ्गे ।

मूलमन्त्रवत्करषडङ्गन्यासाः ।

ध्यानम्—कालानलनिभां देवीं ज्वलत्पुञ्जशिरोरुहाम् ।
कोटिबाहुसमायुक्तां वैरिजिह्वासमन्वितम् ॥१॥
स्तम्भनास्त्रमयीं देवीं दृढपीनपयोधराम् ।
मदिरामदसंयुक्तां बृहद्भानुमुखीं भजे ॥२॥

[सप्तदशः पटलः- पृष्ठ-४२--४३]

६. **श्रीबगलामुखीशताक्षरीमहामन्त्रः**—ह्लीं ऐं ह्रीं क्लीं श्रीं ग्लौं ह्लीं बगलामुखि स्फुर स्फुर सर्वदुष्टानां वाचं मुखं पदं स्तम्भय स्तम्भय प्रस्फुर प्रस्फुर विकटाङ्गि घोररूपि जिह्वां कीलय महाभ्रमकरि बुद्धिं नाशय विराण्मयि[1] सर्वप्रज्ञामयि प्रज्ञां नाशय उन्मादीकुरु[2] कुरु मनोपहारिणि ह्लीं ग्लौं श्रीं क्लीं ह्रीं ऐं ह्लीं स्वाहा ॥

ॐ अस्य श्रीबगलामुखीशताक्षरीमहामन्त्रस्य श्रीब्रह्मा ऋषिः, गायत्रीछन्दः, जगत्स्तम्भनकारिणी श्रीबगलामुखी देवता, ह्लीं बीजं, ह्रीं शक्तिः, ऐं कीलकं, जगत्स्तम्भनकारिणी श्रीबगलामुखीदेवताम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

मूलमन्त्रवत्करषडङ्गन्यासाः ।

ध्यानम्—पीताम्बरधरां सौम्यां पीतभूषणभूषिताम् ।
स्वर्णसिंहासनस्थां च मूले कल्पतरोरधः ॥१॥
वैरिजिह्वाभेदनार्थं छुरिकां[3] बिभ्रतीं शिवाम् ।
पानपात्रं गदां पाशं धारयन्तीं भजाम्यहम् ॥२॥

(सप्तदशः पटलः-- पृष्ठ-४४--४५)

---

१. 'विरामय' इत्यपि पाठः . 'उन्मादं कुरु' इति पाठोऽपि दृश्यते । ३. 'क्षुरिकां' इति पाठोऽन्यत्र ।

१०. अष्टाविंशत्युत्तरैकशताक्षरः श्रीबगलामुखीपरविद्याभेदनमन्त्रः[१]—ॐ ह्लीं श्रीं ह्रीं 'ग्लौं ऐं क्लीं हुँ क्षीं'[२] बगलामुखि परप्रयोगं ग्रस ग्रस ॐ ह्लीं श्रीं ह्रीं ग्लौं ऐं क्लीं हुँ क्षीं ब्रह्मास्त्ररूपिणि परविद्याग्रसिनि भक्षय भक्षय ॐ ह्लीं श्रीं ह्रीं ग्लौं ऐं क्लीं हुँ क्षीं परप्रज्ञाहारिणि प्रज्ञां भ्रंशय भ्रंशय ॐ ह्लीं श्रीं ह्रीं ग्लौं ऐं क्लीं हुँ क्षीं स्तम्भनास्त्ररूपिणि बुद्धिं नाशय नाशय पञ्चेन्द्रियज्ञानं भक्ष भक्ष ॐ ह्लीं श्रीं ह्रीं ग्लौं ऐं क्लीं हुँ क्षीं बगलामुखि हुँ फट् स्वाहा ।[२]

ॐ अस्य श्रीपरविद्याभेदिनीबगलामन्त्रस्य श्रीब्रह्मा ऋषिः, गायत्रीछन्दः, परविद्याभक्षिणी श्रीबगलामुखी देवता, आँ बीजं, ह्रीं शक्तिः क्रों कीलकं, श्रीबगलादेवीप्रसादसिद्धिद्वारा परविद्याभेदनार्थे जपे विनियोगः ।

ऋष्यादिन्यासः—श्रीब्रह्मर्षये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, परविद्याभक्षिणीश्रीबगलामुखीदेवतायै नमो हृदये, आं बीजाय नमो गुह्ये, ह्रीं शक्तये नमः पादयोः, क्रों कीलकाय नमः सर्वाङ्गे ।

करन्यासः—आँ ह्रीं क्रों अङ्गुष्ठाभ्यां नमः, वद वद तर्जनीभ्यां स्वाहा, वाग्वादिनि मध्यमाभ्यां वषट्, स्वाहा अनामिकाभ्यां हुँ, ऐं क्लीं सौं कनिष्ठिकाभ्यां वौषट्, ह्लीं करतलकरपृष्ठाभ्यां फट् ।

हृदयादिन्यासः—आँ ह्रीं क्रों हृदयाय नमः, वद वद शिरसे स्वाहा, वाग्वादिनि शिखायै वषट्, स्वाहा कवचाय हुँ, ऐं क्लीं सौं नेत्रत्रयाय वौषट्, ह्लीं अस्त्राय फट् ।

ध्यानम्—सर्वमन्त्रमयीं देवीं सर्वाकर्षणकारिणीम् ।
सर्वविद्याभक्षिणीं च भजेऽहं विधिपूर्वकम् ॥

[विंशः पटलः—पृष्ठ-५४-५५]

११. त्रिचत्वारिंशदक्षरो बगलास्त्रमन्त्रः—ॐ[३] ह्लीं हुं ग्लौं ह्लीं बगलामुखि मम शत्रून् ग्रस ग्रस खाहि खाहि भक्ष भक्ष शोणितं पिब पिब बगलामुखि ह्लीं ग्लौं हुं 'फट् स्वाहा'[४] ।

---

१. सूत्रानुसारेण वर्णोद्धारादयं मंत्रः सप्तविंशोत्तरशताक्षर एव भवति । २. 'ग्लौं हुँ ऐं क्लीं क्षीं' तथा 'यु एं क्लीं हुँ क्ष्मीं' इति पाठभेदौ क्वचिद्दृश्येते ।

३. यद्यपि पुस्तके तु 'ॐ' शब्दस्योपयोगो नावलोक्यते, न चैतादृश एव 'स्वाहा' शब्दव्यवहारस्तथापि शब्दद्वयी अत्यावश्यकी संभाव्या वर्णसंख्यानुपूरकत्वात् ४. रा.कृ. पुस्तके 'फट्-स्वाहा' स्थाने 'ह्लीं स्वाहा' इति दृश्यते । अत्र पुस्तकेऽप्ययं मन्त्रो द्विचत्वारिंशदक्षरात्मक एव गृहीतः किन्त्वसौ ऋष्यादिन्यासे 'फट् कीलक' मिति ग्रहणादसाधुरेव प्रतीयते ।

ॐ अस्य श्रीबगलास्त्रमन्त्रस्य श्रीदुर्वासा ऋषिः, अनुष्टुप् छन्दः, अस्त्ररूपिणीश्रीबगलामुखी देवता, ग्लौं बीजं, ह्लीं शक्तिः, फट् कीलकं श्रीअस्त्ररूपिणीबगलाम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ऋष्यादिन्यासः—श्रीदुर्वाससे ऋषये नमः शिरसि, अनुष्टुप्छन्दसे नमो मुखे, अस्त्ररूपिण्यै श्रीबगलादेवतायै नमो हृदये, ग्लौं बीजाय नमो गुह्ये, ह्लीं शक्तये नमः पादयोः, फट् कीलकाय नमः सर्वाङ्गे ।

करन्यासः—ॐ ह्लीं अङ्गुष्ठाभ्यां नमः, बगलामुखि तर्जनीभ्यां स्वाहा, सर्वदुष्टानां मध्यमाभ्यां वषट्, वाचं मुखं पदं स्तम्भय अनामिकाभ्यां हुँ, जिह्वां कीलय कनिष्ठिकाभ्यां वौषट्, बुद्धिं विनाशय ह्लीं ॐ स्वाहा करतलकरपृष्ठाभ्यां फट् ।

हृदयादिन्यासः—ॐ ह्लीं हृदयाय नमः, बगलामुखि शिरसे स्वाहा, सर्वदुष्टानां शिखायै वषट्, वाचं मुखं पदं स्तम्भय कवचाय हुँ, जिह्वां कीलय नेत्रत्रयाय वौषट्, बुद्धिं विनाशय ह्लीं ॐ स्वाहा अस्त्राय फट् ।

ध्यानम्—चतुर्भुजां त्रिनयनां पीनोन्नतपयोधराम् ।
जिह्वां खड्गं पानपात्रं 'गदां धारयन्तीं पराम्'[1] ॥१॥
पीताम्बरधरां देवीं पीतपुष्पैरलङ्कृताम् ।
बिम्बोष्ठीं चारुवदनां मदाघूर्णितलोचनाम् ॥२॥
सर्वविद्याकर्षिणीं च सर्वप्रज्ञापहारिणीम् ।
भजेऽहं चास्त्रबगलां सर्वाकर्षणकर्मसु ॥३॥

[द्वाविंशः पटलः—पृष्ठ-५९-६०]

१२. श्रीबगलाचतुरक्षरीमन्त्रः—ॐ आँ ह्लीं क्रों । ॐ अस्य श्रीबगलाचतुरक्षरीमन्त्रस्य श्रीब्रह्मा ऋषिः, गायत्रीछन्दः, श्रीबगला देवता, ह्लीं बीजं, आँ शक्तिः, क्रों कीलकं श्रीबगलामुखीदेवताम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ऋष्यादिन्यासः—श्रीब्रह्मर्षये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, श्रीबगलादेवतायै नमो हृदये, ह्लीं बीजाय नमो गुह्ये, आं शक्तये नमः पादयोः, क्रों कीलकाय नमः सर्वाङ्गे ।

करन्यासः—ॐ ह्लां अङ्गुष्ठाभ्यां नमः, ॐ ह्लीं तर्जनीभ्यां स्वाहा, ॐ ह्लूं मध्यमाभ्यां वषट्, ॐ ह्लैं अनामिकाभ्यां हुँ, ॐ ह्लौं कनिष्ठिकाभ्यां वौषट्, ॐ ह्लः अस्त्राय फट् ।

---

१. '—' 'गदामस्त्रं च बिभ्रतीं' तथा च 'गदां धारयन्तीं शिवाम्' इति पाठभेदौ क्वचित् ।

हृदयादिन्यासः—ॐ ह्लां हृदयाय नमः, ॐ ह्लीं शिरसे स्वाहा, ॐ ह्लूं शिखायै वषट्, ॐ ह्लैं कवचाय हुँ, ॐ ह्लौं नेत्रत्रयाय वौषट्, ॐ ह्लः अस्त्राय फट् ।

ध्यानम्—कुटिलालकसंयुक्तां मदाघूर्णितलोचनाम् ।
मदिरामोदवदनां प्रवालसदृशाधराम् ।।१।।
सुवर्णशैलसुप्रख्यकठिनस्तनमण्डलाम्[1] ।
दक्षिणावर्त्तसन्नाभिसूक्ष्ममध्यमसंयुताम् ।।२।।
रम्भोरुपादपद्मां तां पीतवस्त्रसमावृताम् ।

[पञ्चविंशः पटलः—पृष्ठ-६७-६८]

१३. **अशीत्यक्षरात्मकः श्रीबगलाहृदयमन्त्रः**—ॐ[2] आं ह्लीं क्रों ग्लौं[3] हुँ ऐं क्लीं श्रीं ह्रीं बगलामुखि आवेशय आवेशय आं ह्लीं क्रों ब्रह्मास्त्ररूपिणि एहि एहि आं ह्लीं क्रों मम हृदये आवाहय आवाहय सन्निधिं[4] कुरु कुरु आं ह्लीं क्रों मम हृदये चिरं तिष्ठ तिष्ठ आं ह्लीं क्रों हुँ फट् स्वाहा ।

अस्य मंत्रस्य ऋष्यादिन्यास-ध्यानादयो नैवोल्लिखिताः पुस्तके ।

[अष्टाविंशः पटलः—पृष्ठ-७७-७८]

१४. **श्रीबगलाष्टाक्षरात्मको मन्त्रः**—ॐ आं ह्लीं क्रों हुँ फट् स्वाहा ।

ॐ अस्य श्रीबगलाष्टाक्षरात्मकमन्त्रस्य श्रीब्रह्मा ऋषिः, गायत्रीछन्दः, श्रीबगलामुखी देवता, ॐ बीजं, ह्लीं शक्तिः, क्रों कीलकं श्रीबगलादेवताम्बाप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ऋष्यादिन्यासः—श्रीब्रह्मर्षये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, श्रीबगलामुखीदेवतायै नमो हृदि, ॐ बीजाय नमो गुह्ये, ह्लीं शक्तये नमः पादयोः, क्रों कीलकाय नमः सर्वाङ्गे ।

करन्यासः—ॐ ह्लां अङ्गुष्ठाभ्यां नमः, ॐ ह्लीं तर्जनीभ्यां स्वाहा, ॐ ह्लूं मध्यमाभ्यां वषट्, ॐ ह्लैं अनामिकाभ्यां हुँ, ॐ ह्लौं कनिष्ठिकाभ्यां वौषट्, ॐ ह्लः करतलकरपृष्ठाभ्यां फट् ।

हृदयादिन्यासः—ॐ ह्ला हृदयाय नमः,ॐ ह्लीं शिरसे स्वाहा, ॐ ह्लूं शिखायै वषट्, ॐ ह्लैं कवचाय हुँ, ॐ ह्लौं नेत्रत्रयाय वौषट्, ॐ ह्लः अस्त्राय फट् ।

---

१. सुवर्णशैलविलसत्० इत्यपि क्वचित् । २. यद्यपीदं सूत्रे नैव सूत्रितं किन्त्वनेन विनाऽयं मंत्रः एकोनाशीत्यक्षरात्मकः स्यादत एवात्र स्वं कृतम् ३. 'ग्लौं' इति शक्तिवाराहबीजस्थाने रा० पुस्तके भूवाराहबीजं 'ह्लूं' इति वर्त्तते । ४. 'सान्निध्य'मपीति पाठोऽन्यत्र ।

ध्यानम्—युवतीं[1] च मदोद्रिक्तां[2] पीताम्बरधरां शिवाम् ।
पीतभूषणभूषाङ्गीं समपीनपयोधराम् ॥१॥
मदिरामोदवदनां प्रवालसदृशाधराम् ।
'पानपात्रं च शुद्धिं च'[3] बिभ्रतीं बगलां स्मरेत् ॥२॥
[त्रिंशः पटलः-पृष्ठ-८१]

१५. एकोनषष्टिवर्णात्मकः श्रीबगलोपसंहारविद्यामन्त्रः—ग्लौं हुँ ऐं ह्रीं[4] श्रीं कालि कालि महाकालि एहि एहि कालरात्रि आवेशय आवेशय महामोहे महामोहे स्फुर स्फुर प्रस्फुर प्रस्फुर स्तंभनास्त्रशमनि हुँ फट् स्वाहा ।[5]

ॐ अस्य श्रीबगलास्त्रोपसंहारविद्यामन्त्रस्य श्रीब्रह्मा ऋषिः, गायत्रीछन्दः, स्तंभनास्त्रविभेदिनी श्रीकालिका देवता, क्रीं बीजं, फट् शक्तिः, स्वाहा कीलकं श्रीबगलाप्रसादसिद्धिद्वारा ब्रह्मास्त्रोपसंहारार्थे जपे विनियोगः ।

ऋष्यादिन्यासः—श्रीब्रह्मर्षये नमः शिरसि, गायत्रीछन्दसे नमो मुखे, स्तम्भनास्त्रविभेदिनीश्रीकालिकादेवतायै नमो हृदये, क्रीं बीजाय नमो गुह्ये, फट्शक्तये नमः पादयोः, स्वाहा कीलकाय नमः सर्वाङ्गे ।

करन्यासः—ॐ क्राँ अङ्गुष्ठाभ्यां नमः, ॐ क्रीं तर्जनीभ्यां स्वाहा, ॐ क्रूँ मध्यमाभ्यां वषट्, ॐ क्रैं अनामिकाभ्यां हुँ, ॐ क्रौं कनिष्ठिकाभ्यां वौषट्, ॐ क्रः करतलकरपृष्ठाभ्यां फट् ।

हृदयादिन्यासः—ॐ क्राँ हृदयाय नमः, ॐ क्रीं शिरसे स्वाहा, ॐ क्रूं शिखायै वषट्, ॐ क्रैं कवचाय हुँ, ॐ क्रौं नेत्रत्रयाय वौषट्, ॐ क्रः अस्त्राय फट् ।

ध्यानम्—कालीं करालवदनां कलाधरधरां शिवाम् ।
स्तम्भनास्त्रैकसंहारीं ज्ञानमुद्रासमन्विताम् ॥१॥
वीणापुस्तकसंयुक्तां कालरात्रिं नमाम्यहम् ।
बगलास्त्रोपसंहारीदेवतां विश्वतोमुखीम् ॥२॥
भजेऽहं कालिकां देवीं जगद्वशकरां शिवाम् ।
[द्वात्रिंशः पटलः—पृष्ठ—८७-८८]

---

१. 'यौवना' मित्यन्यत्र । २. 'मदोन्मत्ता' मित्यपि पाठः । ३. 'वैरिजिह्वां पानपात्रं' इति पाठोऽपि दृश्यते । ४. 'क्रीं' इत्यन्यत्र । ५. एष मन्त्रस्तु रा० पुस्तकधृतसूत्रोद्धार-स्वरूपः । पुस्तकस्थसूत्रात्तु त्रिपञ्चाशद्वर्णात्मक एष मंत्रो जायते 'कालरात्रि' पदान्ते 'आवेशय आवेशय' इति पदद्वयविरहात् ।

१६. द्वात्रिंशद्वर्णात्मकस्तार्क्ष्यमालामन्त्रः[1]—ॐ क्षीं नमो भगवते क्षीं पक्षिराजाय सर्वाभिचारध्वंसकाय क्षीमों फट् स्वाहा ।

[बगलोत्कीलनविधिः]—

प्रणवं पूर्वमुच्चार्य कूर्चयुग्मं समुच्चरेत् ।
कामत्रयं वाग्भवं च लज्जाषट्कं समुच्चरेत् ॥१॥
क्रींकाराष्टकमुच्चार्य बगलाशापमुच्चरेत् ।
उत्कीलनपदद्वन्द्वं अग्निजायां समुद्धरेत् ॥२॥
शापोद्धारप्रकारोऽयं तन्त्रराजे प्रकीर्त्तितः ।
उत्कीलिता ब्रह्मविद्या मन्त्रेनानेन सिद्धयति ॥३॥

स्पष्टार्थः—ॐ हूँ हूँ क्लीं क्लीं क्लीं ऐं ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं ह्रीं क्रीं क्रीं क्रीं क्रीं क्रीं क्रीं क्रीं क्रीं बगलाशापमुत्कीलय उत्कीलय स्वाहा ॥

परिशिष्टम् (ख)

॥ अथ वज्रपञ्जरकवचस्तोत्रम् ॥

ध्यात्वा मनसा सम्पूज्य मुद्राः प्रदर्श्य पञ्जरं न्यसेत्—

शिव उवाच—

पञ्जरं तत्प्रवक्ष्यामि देव्याः पापप्रणाशनम् ।
यं प्रविश्य न बाधन्ते बाणैरपि नरा भुवि ॥१॥

ॐ ऐं हं श्रीं श्रीमत्पीताम्बरा देवी बगला बुद्धिवर्द्धिनी ।
पातु मामनिशं साक्षात् सहस्रार्कयुतद्युतिः ॥२॥

शिखादिपादपर्य्यन्तं वज्रपञ्जरधारिणी ।
श्रीब्रह्मास्त्रविद्या या पीताम्बरविभूषिता ॥३॥

बगला मामवत्वत्र मूर्द्धभागं महेश्वरी ।
कामाङ्कुशा कला पातु बगला शास्त्रबोधिनी ॥४॥

---

१. अयं मन्त्रः पुस्तके द्वात्रिंशाक्षर एवोद्घोषितः किन्तूद्धारात्त्रिशाक्षर एव संभवति स चोपरि प्रदर्शित एव । रा० पुस्तके चैष एव मंत्रः षड्विंशाक्षर एव स्वीकृतोऽस्ति यथा—'ॐ क्षीं ॐ नमो भगवते पक्षिराजाय अभिचारध्वंसकाय हुँ फट् स्वाहा'

पीताम्बरा सहस्राक्षी ललाटे कामितार्थदा ।
ॐ ऐं ह्लीं श्रीं श्रीः [मे]पातु पीताम्बरसुधारिणी ॥५॥

कर्णयोश्चैव युगपदतिरत्नप्रपूजिता ।
ॐ ऐं ह्लीं श्रीं पातु बगला नासिकां मे गुणाकरा ॥६॥

पीतपुष्पैः पीतवस्त्रैः पूजिता वेददायिनी ।
ॐ ऐं ह्लीं श्रीं पातु बगला ब्रह्मविष्ण्वादिसेविता ॥७॥

पीताम्बरा प्रसन्नास्या नेत्रयोर्युगपद्भ्रुवोः ।
ॐ ऐं ह्लीं श्रीं पातु बगला बलदा पीतवस्त्रधृक् ॥८॥

अधरोष्ठौ तथा दन्तान् जिह्वां च मुखगा मम ।
ॐ ऐं ह्लीं श्रीं पातु बगला पीताम्बरसुधारिणी ॥९॥

गले हस्ते तथा बाहौ युगपद्बुद्धिदा सताम् ।
ॐ ऐं ह्लीं श्रीं पातु बगला पीतवस्त्रावृता घना ॥१०॥

जङ्घायां च तथा चोरौ गुल्फयोश्चातिवेगिनी ।
अनुक्तमपि यत्स्थानं त्वक्केशनखलोम मे ॥११॥

असृग्मांसं तथास्थीनि सन्धयश्चाति मे परा ।

श्रीशिव उवाच—

इत्येतद्वरदं गोप्यं कलावपि विशेषतः ॥१२॥

पञ्जरं बगलादेव्या दीर्घदारिद्र्यनाशनम् ।
पञ्जरं यः पठेद्भक्त्या स विघ्नैर्नाभिभूयते ॥१३॥

अव्याहतगतिश्चापि ब्रह्मविष्ण्वादिसत्पुरे ।
स्वर्गे मर्त्ये च पाताले नारयस्तं कदाचन ॥१४॥

प्रबाधन्ते नरं व्याघ्राः पञ्जरस्थं कदाचन ।
अतो भक्तैः कौलिकैश्च स्वरक्षार्थं सदैव हि ॥१५॥

पठनीयं प्रयत्नेन सर्वानर्थविनाशनम् ।
महादारिद्र्यशमनं सर्वमाङ्गल्यवर्द्धनम् ॥१६॥

विद्याविनयसत्सौख्यं महासिद्धिकरं परम् ।
इदं ब्रह्मास्त्रविद्यायाः पञ्जरं साधु गोपितम् ॥१७॥

पठेत् स्मरेद् ध्यानसंस्थः स जीयान्मरणं नरः ।
यः पञ्जरं प्रविश्यैवं मन्त्रं जपति वै भुवि ॥१८॥

कौलिको वा कौशिको वा व्यासवद् विचरेद् भुवि ।
चन्द्रसूर्यप्रभुर्भूत्वा वसेत् कल्पायुतं दिवि ॥१९॥

सूत उवाच—

इति कथितमशेषं श्रेयसामादिबीजं,
भवशतदुरितघ्नं ध्वस्तमोहान्धकारम् ।
स्मरणमतिशयेन प्रातरेवात्र मर्त्यो,
यदि विशति सदा यः पञ्जरं पण्डितः स्यात् ॥२०॥

इति श्रीपरमरहस्यातिरहस्ये श्रीपीताम्बरायाः
पञ्जरं सम्पूर्णम् ॥

श्रीप्रसन्नास्तु ॥ श्रीबगलामुखी प्रीयतां मिति पोष सुदि १३,
संवत् १९२२ लिखितं काश्यां दुर्गाबाई इदं पुस्तकम् ॥

परिशिष्टम् (ग)

॥ अथ बगलामुखीत्रैलोक्यविजयं नाम कवचम् ॥

श्रीभैरव उवाच—

शृणु देवि प्रवक्ष्यामि स्वरहस्यं च कामदम् ।
श्रुत्वा गुप्ततमं गोप्यं कुरु गुप्तं सुरेश्वरि ॥१॥
कवचं बगलामुख्याः सकलेष्टप्रदं कलौ ।
यत्सर्वं च परं गुह्यं गुप्तं च शरजन्मनः ॥२॥
त्रैलोक्यविजयं नाम कवचेशं मनोरमम् ।
मन्त्रगर्भं मन्त्ररूप सर्वसिद्धिविनायकम् ॥३॥
रहस्यं परमं ज्ञेय साक्षादमृतरूपिणम् ।
ब्रह्मविद्यामयं वर्म दुर्लभं प्राणिनां कलौ ॥४॥
पूर्णमेकोनपञ्चाशद्वर्णमन्त्रमयैर्युतम् ।
त्वद्भक्त्या वच्मि देवेशि गोपनीयं स्वयोनिवत् ॥५॥

श्रीदेव्युवाच—

भगवन् करुणासागर विश्वनाथ सुरेश्वर ।
कर्मणा मनसा वाच्यं न वच्म्यग्निभुवोऽपि च ॥६॥

भैरव उवाच—

त्रैलोक्यविजयाख्यस्य कवचस्यास्य पार्वति ।
मन्त्रगर्भस्य मु(सू?) क्तस्य ऋषिर्देवस्तु भैरवः ॥७॥

उष्णिक् छन्दः समाख्यातं देवी क्लीं (च?) बगलामुखी ।
बीजं क्लीं ओं च शक्तिः स्यात् स्वाहा कीलकमुच्यते ॥८॥

विनियोगः समाख्यातस्त्रिवर्गफलसाधने ।
देवीं ध्यात्वा पठेद्वर्म मन्त्रगर्भं सुरेश्वरि ॥९॥

विना ध्यानेन नो सिद्धिः सत्यं जानीहि पार्वति ।

चन्द्रोद्भासितमूर्द्धजां रिपुरसां मुण्डाक्षमालाकरां,
बालां पीतस्रगुज्वलां मधुमदारक्तां जटाजूटिनीम् ।
शत्रुस्तम्भनकारिणीं शशिमुखीं पीताम्बरोद्भासितां,
प्रेतस्थां बगलामुखीं भगवतीं कारुण्यरूपां भजे ॥१०॥

ॐ क्लीं मम शिरसि पातु देवी ह्लीं बगलामुखी ।
ॐ क्लीं पातु मे भाले देवी स्तम्भनकारिणी ॥११॥

ॐ ग्रँ ईं हं भ्रुवौ पातु बगला क्लेशहारिणी ।
ॐ हं क्षं पातु मे नेत्रे नारसिंही शुभङ्करी ॥१२॥

ॐ ह्रीं श्रीं पातु मे जङ्घे ग्रं ग्रां इं भुवनेश्वरी ।
ॐ क्लीं सः मे श्रुती पातु ईं उं ऊं ऋं मुखेश्वरी ॥१३॥

ॐ ह्रीं क्रीं ह्रीं सदाव्यान्मे नासां ऋं लृं सरस्वती ।
ॐ ह्रीं ह्रां मे मुखं पातु लृं एं ऐं छिन्नमस्तका ॥१४॥

ॐ श्रीं मे अधरौ पातु ओं औं दक्षिणकालिका ।
ॐ ह्रीं हू मे दन्तान् पातु अं अः मे भद्रकालिका ॥१५॥

ॐ क्रीं श्रीं रसनां पातु कं खं गं घं चरात्मिका ।
ॐ ऐं सौः मे हनौ पातु ङं चं छं जं च जानकी ॥१६॥

ॐ श्रीं ग्रीं (क्लीं) मे गलं पातु झं ञं टं ठं गणेश्वरी ।
ॐ ह्रीं स्कन्धौ सदाव्यान्मे डं ढं णं चैव तोतला ॥१७॥

ॐ ह्रीं मे भुजौ पातु तं थं दं वरवर्णिनी ।
ॐ क्लीं सौः मे स्तनौ पातु धं नं पं परमेश्वरी ॥१८॥

ॐ जूं क्रों मे रक्ष वक्षः फं वं भं भगवासिनी ।
ॐ क्राँ ह्राँ पातु मे कुक्षि मं यं रं चक्रिवल्लभा ॥१६॥

ॐ श्रीं ह्रूं पातु मे पार्श्वौ लं वं लम्बोदरप्रसूः ।
ॐ क्रौं ह्रूं पातु मे नाभिं शं गं षण्मुखपालिनी ॥२०॥

ॐ ऐं सौः पातु मे पृष्ठं सं हं हाटकरूपिणी ।
ॐ क्लीं ऐं पातु मे शिश्नं ळं क्षं हं तत्वरूपिणी ॥२१॥

ॐ क्लीं ह्रूं मे कटिं पातु पञ्चाशद्वर्णमातृका ।
ॐ ऐं क्लीं पातु मे गुह्यं अं आं कं गुह्यकेश्वरी ॥२२॥

ॐ श्रीं ऊरू सदाव्यान्मे इं ईं खं रंगगामिनी ।
ॐ जूं सः पातु मे जानू उं ऊं गं गणवल्लभा ॥२३॥

ॐ श्रीं ह्रीं पातु मे जङ्घे ऋं ॠं घं च महारिणी ।
ॐ श्रीं सः पातु मे गुल्फौ लृं ॡं ङं चं च कालिका ॥२४॥

ॐ ऐं ह्रीं पातु मे सन्धी एं ऐं छं जं जगत्प्रिया ।
ॐ श्रीं क्लीं पातु मे पादौ ओं औं झं ञं भगादरी ॥२५॥

ॐ ह्रीं मे सर्ववपुः पातु अं अः ह्रीं त्रिपुरेश्वरी ।
ॐ श्रीं पूर्वे सदाव्यान्मां अं आँ टं ठं शिखामुखी ॥२६॥

ॐ ह्रीं याम्यां सदाव्यान्मां इं डं ढं णं च तारिणी ।
ॐ ह्रीं मां पातु वारुण्यां ईं तं थं दं च खेश्वरी ॥२७॥

ॐ यं मां पातु कौबेर्यां उं धं नं पं पिलंपिला ।
ॐ श्रीं पातु चैशान्यां ऊं फं बं वैन्दवेश्वरी ॥२८॥

ॐ श्रीं मां पातु चाग्नेय्यां ऋं भं मं यं च योगिनी ।
ॐ ऐं मां पातु नैर्ऋत्यां ॠं रं राजेश्वरी सदा ॥२९॥

ॐ श्रीं मां पातु वायव्यां लृं लं लम्बितकेशिनी ।
ॐ प्रभाते च मां पातु ॡं वं वागीश्वरी सदा ॥३०॥

ॐ मध्याह्ने च मां पातु एं शं शङ्करवल्लभा ।
ॐ ह्रीं क्लीं श्रीं पातु मां सायं ऐं षं शाबरी सदा ॥३१॥

ह्रीं निशादौ च मां पातु ओं सं सागरशायिनी ।
क्लीं निशीथे च मां पातु औं हं हरिहरेश्वरी ॥३२॥

क्लीं ब्राह्मे मां मुहूर्त्तेऽव्यादं ळं त्रिपुरसुन्दरी ।
विस्मारितं च यत्स्थानं वर्जितं कवचेन तु ॥३३॥
ह्लीं तन्मे सकलं पातु अः क्षः क्लीं बगलामुखी ।
इतीदं कवचं गुह्यं मन्त्राक्षरमयं परम् ॥३४॥
त्रैलोक्यविजयं नाम सर्ववर्णमयं स्मृतम् ।
अप्रकाश्यमदातव्यं न श्रोतव्यमवाचकम् ॥३५॥
दुर्जनायाकुलीनाय दीक्षाहीनाय पार्वति ।
न दातव्यं न दातव्यमित्याज्ञा परमेश्वरि ॥३६॥
अदीक्षित उपाध्यायविहीनः शक्तिभक्तिमान् ।
कवचस्यास्य पठनात् साधको दीक्षितो भवेत् ॥३७॥
कवचेशमिदं गोप्यं सिद्धविद्यामयं परम् ।
ब्रह्मविद्यामयमिदं यथाभीष्टफलप्रदम् ॥३८॥
न कस्य कथितं चैतत् त्रैलोक्यविजयेश्वरी ।
यस्य स्मरणमात्रेण देवी सद्यो वशीभवेत् ॥३९॥
पठनाद्धारणाच्चास्य कवचेशस्य साधकः ।
कलौ विचरते वीरो यथा ह्लीं बगलामुखी ॥४०॥
इमं मन्त्रं स्मरन्मन्त्री संग्रामं प्रविशद् यथा ।
त्रिः पठेत् कवचेशन्तु युयुत्सुः साधकोत्तमः ॥४१॥
शत्रून् कालसमानान् तु जित्वा स्वगृहमेष्यति ।
मूर्ध्नि धृत्वा तु कवचं मन्त्रगर्भं तु साधकः ॥४२॥
ब्रह्माद्यानमरान् सर्वान् सहसा वशमानयेत् ।
धृत्वा गले तु कवचं साधकस्य महेश्वरि ॥४३॥
वशमायान्ति सहसा रम्भाद्यप्सरसां गणाः ।
उत्पातेषु च घोरेषु भयेषु विविधेषु च ॥४४॥
रोगेषु कवचेशं च मन्त्रगर्भं पठेन्नरः ।
कर्मणा मनसा वाचा तद्भयं शान्तिमेष्यति ॥४५॥
श्रीदेव्या बगलामुख्याः कवचेशं मया स्मृतम् ।
त्रैलोक्यविजयं नाम पुत्रपौत्रधनप्रदम् ॥४६॥
ऋणहर्त्तारमेतत्स्याल्लक्ष्मीभोगविवर्द्धनम् ।
वन्ध्या धारयते कुक्षौ पुत्रं पश्यति नान्यथा ॥४७॥

मृतवत्सा च विभृत्याथ कवचं बगले सदा ।
दीर्घायुर्व्याधिहीनस्तु तत्पुत्रस्तु भविष्यति ।।४८।।
इतीदं बगलामुख्याः कवचेशं सुदुर्लभम् ।
त्रैलोक्यविजयं नाम न देयं यस्य कस्यचित् ।।४६।।
अकुलीनाय मूढाय भक्तिहीनाय देहिने ।
लोभयुक्ताय देवेशि न दातव्यं कदाचन ।।५०।।
शिष्याय भक्तियुक्ताय गुरुभक्तिपराय च ।
लोभदन्तविहीनाय कवचेशं प्रदीयताम् ।।५१।।
अभक्तेभ्यो विपुत्रेभ्यो दत्वा कुष्ठी भवेन्नरः ।
फलं गृहं न चाप्नोति परं च नरकं व्रजेत् ।।५२।।
दीपमुज्ज्वाल्य मूलेन पठेद्वर्मेदमुत्तमम् ।
प्राप्ते कन्यार्कवारे च राजा तद्गृहमेष्यति ।।५३।।
मण्डलेशो महेशानि सत्यं सत्यं न संशयः ।
इदं तु कवचेशं तु मया दिव्यं नगात्मने ।।५४।।
पूजनात् पठनाच्चास्य चतुर्व्वर्गफलप्रदम् ।
गोप्यं गुप्ततरं देवि गोपनीयं स्वयोनिवत् ।।५५।।

इति रुद्रयामले उमामहेश्वरसंवादे बगलामुखीत्रैलोक्यविजयं नाम कवचं सम्पूर्णं श्रीजगदम्बार्पणमस्तु । मिति माघकृष्ण ५ संवत् १९२२ ईदं दुर्गाग्राः ।

परिशिष्टम् (घ)

।। अथ श्रीपीताम्बरारत्नावलीस्तोत्रम् ।।

।। श्रीगणेशाय नमः ।। श्रीपीताम्बरायै नमः ।।

ओङ्कारद्वयसम्पुटान्तरपुटं मायास्थिराद्वन्द्वितं,
तन्मध्ये बगलामुखीति विमलं सम्बोधनं सर्वं च ।
दुष्टानामथ वाचमाशु च मुखं[1] संस्तम्भयेत्यक्षरं,
जिह्वां कीलय कीलयेति च[2] लिखेद् बुद्धिं तथा नाशय ।।१।।
ब्रह्मास्त्रं सकलार्थसिद्धिजनकं षट्त्रिंशदर्णात्मक-
म्प्रोक्तं पद्मभुवा हिताय जगतां यन्नारदाग्रे पुरा ।

१. ख० पदं । २. वि ।

जीवन्मुक्तपदे विभान्ति सुधियो येषां मुखे भासते,
निर्द्वन्द्वामृतसागरेन्दुकिरणाहाराश्चकोरास्तु ते ॥२॥
ओमित्यादिस्वरूपं[1] जपति तव शिवे शब्दतन्मात्रगर्भा-[2]
वाचो यस्मात् परार्थप्रकटितपटवो वर्णरूपा निरीयुः ।
ब्रह्माद्यैः पञ्चतत्वैः परिवृतमनघं चित्प्रबोधाधिगम्यं,
दुर्ज्ञेयं योगयुक्तैः कथमपि मनसा[3] योगिभिर्गृह्यमाणम् ॥३॥
ह्लीं[4] बीज 'हृदि यस्य'[5] भाति विमलं लक्ष्मीः स्थिरा तद्गृहे,
धैर्यं तस्य कलेवरेऽपि विशते[6] दीर्घायुषो भूतले ।
कल्पान्तेष्वपि वृद्धिमेति विमला तद्वंशवल्ली परा,[7]
शौर्यं स्थैर्यमुपैति तस्य पुरतस्त्रस्यन्ति वादीश्वराः ॥४॥
बद्धुं वारिधिमुद्यतो जनकजानाथोऽपि पीताम्बरे !
त्वां ध्यात्वाऽर्णवशोषणे कृतमतिः सेतुं प्रचक्रे द्रुतम् ।
जित्वा रावणमुग्रशत्रुमबलान् बन्दीन् विमुच्याऽमरान्,
कीर्त्तिं लोकसुखोदयां व्यरचयत् कल्पस्थिरामम्बिके ॥५॥
गर्वी खर्वति रङ्कति क्षितिपतिर्मूकायते वाक्पति-
र्वह्निः शीतति दुर्जनः सुजनते पुष्पायते वासुकिः ।
श्रीनित्ये बगले तवाक्षरपदैर्यन्त्रीकृता[8] यन्त्रिताः,
के के नो निपतन्ति [9]त्रस्तमुकुटाश्चन्द्रार्कतुल्या अपि ॥६॥
लावण्यामृतपूरिते तव कृपापाङ्गे निमग्ना नरा
[10]ब्रह्मेशादिदिगीशवृन्दमपि ते जानन्ति गुञ्जोपमम् ।
येषां चेतसि संस्थिताऽसि बगले ! ते विश्वरक्षाक्षमाः,
प्रारब्धं द्रढयन्ति सत्वरतरं विघ्नैरविघ्नीकृताः ॥७॥
मुख्यत्वं समुपैति संसदि तवाऽपाङ्गावलोके नरः,
किं तच्चित्रमहो स्वयं प्रभवते सृष्टिस्थितिध्वंसने ।
यश्चित्ते तव 'भाति मामक इति'[11] त्वद्दर्शनं यस्य वा,
तं सर्वा ह्यणिमादयोऽप्यतितरामाराधयन्ते ध्रुवम् ॥८॥
क्षीणानां[12] बलदायिनीं जलनिधौ 'पोतस्थितौ नाविकां,'[13]
तत्त्राणं[14] घनकुञ्जगह्वरगिरिव्याघ्रादिभीतेष्वपि[15] ।

